**6** **॰दूरमु॰** ] $K_1L_1P_1$ ; **॰दूरात्समु॰** MV **6** **॰पयन्ति** ] $K_1L_1$ ; **॰पयन्ति च** MV $P_1$ **6** **विपरीतख्याति॰ ⋯ विपरीतख्याताव॰** ] $MVL_1P_1$ ; **विपरीतख्याताव॰** $K_1$(eyeskip) **7** **इति** ] $L_1P_1$ ; **इति च** MV **8** **॰वुपगम्य॰** ] $P_1$ ; **॰वभ्युपगम्य॰** $MVL_1$ **8** **॰संदर्भ॰** ] $MVL_1P_1$ ; **॰संदर्भे** $K_1$ **8** **॰सुभिक्षे सति** ] $MVL_1P_1$ ; **सुभिक्षे** $K_1$ **10** **संवादाद्य॰** ] $MVK_1P_1$ ; **संवादा॰** $M^{ka}$ ; **संवाद्य॰** $L_1$

यदा तु न जगति बाध्यो नाम कश्चिदस्ति बोधः, तदा किंसाधर्म्यात् संशेरतां प्रमातारः। असंशयानाश्च किमिति परमपेक्षन्ताम्। अनपेक्षमाणाश्च कथं परतः प्रामाण्यं प्रतिपद्यन्तामिति निश्चलं स्वत एव प्रामाण्यमवतिष्ठते।

### [1.2 बाधविचारः]

कथं पुनर्बाध्यो नाम नास्ति बोधः। शुक्तिकारजतादिप्रत्ययाः प्राचुर्येण बाध्यमाना दृश्यन्ते।

अनभिज्ञो भवान्। न हि ते बाध्याः प्रत्ययाः। इदं हि निरूप्यताम्।

### [1.2.1 बाधः]

क इवोत्तरेण ज्ञानेन पूर्वस्य बाधः। बाधार्थमेव न विद्मः।

### [1.2.1.1 नाशः]

---

**1** *Tātparyaṭīkā* ad *codanā* 47 (51.3): **ननु नैव शुक्तिकायां रजतज्ञानमप्रमाणम्** (**॰नमप्रमाणम्** ] ms.; **॰नं प्रमाणम्** ed.)।

**6 शुक्तिकारजतादि॰** ] Cf. NM I 416.2–3: **अपि च न चक्षुरादि बाधकज्ञानोदये सति न विरमति, विपरीतवेदनजन्मनः शुक्तिकारजतादिबुद्धिषु विभ्रमस्यापायदर्शनात्।**; NM I 438.13–16: **नूनं चास्य मिथ्यादर्शनेषु—देशान्तरे वा शुक्तिकारजतादिज्ञाने, कालान्तरे कूटकार्षापणादिप्रतीतौ, पुरुषान्तरे वा जाततैमिरिके द्विचन्द्रप्रतीतौ, अवस्थान्तरे पीतशङ्खादिप्रतिभासे—भवति बाधकप्रत्ययः।**

**10** *Tātparyaṭīkā* ad *codanā* 57 (58.3–4): **कः** (**कः** ] ms.; **कथं** ed.) **पुनरयमर्थान्यथात्वज्ञानेन पूर्वस्य बाधः।**

---

**1 जगति बाध्यो नाम** ] $K_1$; **बाध्यो नाम जगति** $MVL_1P_1$ **1 कश्चिदस्ति** ] $K_1P_1$; **कश्चिदपि** $MVL_1$ **2 प्रमातारः** ] $MVK_1L_1^{pc}P_1$; **प्रतारः** $L_1^{ac}$ **2 असंशयानाश्च** ] $MVK_1P_1$; **असंशयनाश्च** $L_1$ **2 ॰क्षन्ताम्** ] $MVK_1P_1$; **॰क्षताम्** $L_1$ **3 अनपेक्षमाणाश्च** ] $K_1L_1P_1$; **अनपेक्षमाणाः** MV **6 शुक्तिका॰** ] $K_1$; **शुक्तिकादौ** $MVL_1P_1$ **6 ॰प्रत्ययाः** ] $MVK_1P_1$; **॰प्रत्ययः** $L_1$ **7 प्राचुर्येण** ] $MVL_1P_1$; **प्राचुर्येण हि** $K_1$ **8 भवान्** ] $VK_1L_1P_1$; **भवान् बाधस्य** M **8 निरूप्यताम्** ] $VK_1L_1P_1$; **निरूपप्यताम्** M **10 इवोत्तरेण** ] $K_1$; **इवोत्तर॰** $MVL_1P_1$ **10 पूर्वस्य** ] $K_1P_1$; **पूर्वज्ञानस्य** $MVL_1$

यदि तावन्नाश एव बाधः, स न तेषामेव, बुद्धेर्बुद्ध्यन्तराद्विरोध इति सकलबोधसाधारणत्वात्।

[1.2.1.2 सहानवस्थानम्]

अथ सहानवस्थानम्, तदपि समानम्, अबाधितानामपि ज्ञानानां सहानवस्थानसंभवात्।

[1.2.1.3 संस्कारोच्छेदः]

अथ संस्कारोच्छेदो बाधः, सो ऽपि तादृगेव, सम्यक्प्रत्ययोपजनितसंस्कारस्याप्युच्छेददर्शनात्। कश्चिच्च भवदभिमतबाध्यबोधाहितो ऽपि संस्कारः सत्यपि बाधकप्रत्यये नोच्छेदमुपगच्छति, कालान्तरे तत्कारणकतद्विषयस्मरणदर्शनात्।

[1.2.1.4 विषयापहारः]

---

**1** *Tātparyaṭīkā* ad *codanā* 57 (58.4–5): न तावन्नाशः, सर्वज्ञानानां विनाशादप्रामाण्यप्रसङ्गात्।

**1** Cf. NM II 197.4–5: विनश्यदवस्था बुद्धिर्बुद्ध्यन्तरविरोधिनीति सामान्येन श्रवणात्।

**4** *Tātparyaṭīkā* ad *codanā* 57 (58.6–7): नापि सहानवस्थानम्, सर्वज्ञानसाधारणत्वात्।

**7** *Tātparyaṭīkā* ad *codanā* 57 (58.5–6): न च संस्कारोच्छेदः, बाधकप्रत्ययोत्पत्तावपि तत्कार्यस्मरणदर्शनात्।

---

**1 ताव॰** ] $MVL_1P_1$; **त्वाव॰** $K_1$ **5 सहानवस्थान॰** ] $K_1$; **सहावस्थाना॰** $MVP_1$; **सहावस्थानाम॰** $L_1$ **7 सम्यक्प्र॰** ] $MVK_1P_1$; **सम्यप्र॰** $L_1$ **8 कश्चिच्च** ] $K_1P_1$; **कश्चिद्** $MVL_1$ **8 भवदभिम॰** ] $MVK_1L_1^{pc}P_1$; **भवभिम॰** $L_1^{ac}$ **8 ॰धाहितो** ] $MVK_1P_1$; **॰धाभिहितो** $M^{ka}L_1$ **10 तत्कारणक॰** ] $MVL_1P_1$; **तत्करणक॰** $K_1$

अथ विषयापहारो बाधः, सो ऽपि दुर्घटः, प्रतिभातत्वेन विषयस्यापहर्तुमशक्यत्वात्। न हि बाधकं ज्ञानमित्थमुत्तिष्ठति “यत्प्रतिभातं तन्न प्रतिभातम्” इति।

[1.2.1.5 तदभावग्रहः]

अथ तदभावग्रहो बाधः, स (१) तात्कालिकः (२) कालान्तरभावी वा।

[1.2.1.5.1 कालान्तरभावी]

कालान्तरभावितदभावग्रहणस्य बाधकत्वे प्रागवगतमुद्गरदलितघटाभावग्राहिणो ऽपि विज्ञानस्य तद्बाधकत्वप्रसङ्गः।

[1.2.1.5.2 तात्कालिकः]

---

**1** Cf. *Pramāṇavārttikālaṃkāra* ad 2.1cd (Ono 2000:5.9–12): अन्येन तु ज्ञानेन तस्य विषयापहारो ऽसत्ताज्ञापनलक्षणो बाधः। न च स्वविषये प्रवृत्तमन्यविषयापहारं रचयितुमलम्। स्वविषयस्वरूपसाधनं हि ज्ञानानां धर्मः। परविषयापहरणं तु नराधिपधर्मः।

**5** *Tātparyaṭīkā* ad *codanā* 57 (58.9–10): स्यादेतत्। नैतदेवमिति पूर्वप्रत्ययगृहीतार्थाभावग्राहकतयोपरितनस्य बाधकत्वमिति।; cf. *Pramāṇavārttikālaṃkāra* ad 2.1cd (Ono 2000:5.3–9): को ऽयं बाधो नाम। परेण विषयाभावज्ञापनं स यदीष्यते। स्वार्थे प्रवृत्तिमज्ज्ञानमभावं ज्ञापयेत् कथम्॥ ६॥ न तावज्ज्ञानान्तरेणाभावः स्वप्नज्ञानस्यान्यस्य वा केनचित् क्रियते, तत्काले तस्य स्वयमेव नाशात्। न चाक्षिनिमीलनान्नष्टे ज्ञाने बाध्यता प्रतीयते।

**8** *Tātparyaṭīkā* ad *codanā* 57 (58.10–11): यदि तावत्कालान्तरे ऽभावं गृह्णाति, ततो विरोधाभावान्न बाधः।

---

**1 विषया°** ] $MK_1L_1P_1$ ; **विषयस्या°** $M^{kha}V$ **1 सो ऽपि** ] $MVK_1L_1$ ; **सो ऽपि तावद्** $P_1$ **1 प्रतिभातत्वेन** ] $MK_1L_1P_1$ ; **प्रतिभासत्वेन** $M^{kha}V$ **5 तात्कालिकः** ] $MVK_1P_1$ ; **तत्कालिकः** $L_1$ **8 °भावितदभाव°** ] $MVK_1P_1$ ; **°भावितदभावा°** $L_1$ **9 °घटा°** ] $MVL_1P_1$ ; **°घ°** $K_1$ **9 °ग्राहिणो** ] $MVL_1P_1$ ; **°ग्रहिणो** $K_1$ **9 ऽपि विज्ञानस्य** ] $MVL_1P_1$ ; **ज्ञानस्य** $K_1$

तदैव तु तदभावग्रहणे प्रत्ययसमर्पितरूपद्वितययोगाद् उभयात्मकमेव तदस्तु वस्तु। किं कस्य बाध्यं बाधकं वा।

### [1.2.1.6 फलापहारः]

अथ फलापहारो बाधः, सो ऽपि न संभवति, संविदः प्रमाणफलस्योत्पन्नत्वेनानपहरणीयत्वात्। न हि "यदुत्पन्नं तदनुत्पन्नम्" इति वदति बाधकः।

### [1.2.1.7 हानादिफलापहारः]

अथ हानादिफलापहारो ऽस्य बाधः, न, तस्य प्रमाणफलत्वाभावात्।

हानादिव्यवहारो हि पुरुषेच्छानिबन्धनः।
न तेनापहृतेनापि प्रमाणं बाधितं भवेत्॥

### [1.2.1.8 उपसंहारः]

तस्मान्न बाधो नाम कश्चित्।

### [1.2.2 समानविषययोर्वा भिन्नविषययोर्वा]

---

**1** *Tātparyaṭīkā* ad *codanā* 57 (58.11–12): **अथ प्रतिभासमानस्यैव तथापि सदसद्भावयोरेकस्मिन् काले प्रतिभासमानत्वेन विरोधाभावादुभयाकारतैवास्तु न बाधः।**
**4** *Tātparyaṭīkā* ad *codanā* 57 (58.5): **नापि कार्यप्रतिबन्धः, अर्थपरिच्छेदस्य बलादुत्पद्यमानत्वात्।**
**11** *Tātparyaṭīkā* ad *codanā* 57 (58.7): **नापि फलापहारः, प्रमाणस्याबाधितत्वात्।**

---

**1 प्रत्यय॰** ] $M^{ka}K_1$ ; **प्रत्ययद्वय॰** $ML_1P_1$ **2 तदस्तु वस्तु** ] $MVL_1P_1$ ; **तदस्तु** $K_1$ **5 ॰फलस्योत्पन्नत्वेना॰** ] $MVL_1P_1$ ; **॰फलत्वेनोत्पन्नस्या॰** $K_1$ **6 बाधकः** ] $MVK_1P_1$ ; **बाधः** $L_1$ **8 ॰लापहारो ऽस्य** ] $K_1P_1$ ; **॰लापहारो** MV; **॰लापरो** $L_1$ **11 न** ] $MVL_1P_1$ ; **कन** $K_1$(unmetrical) **11 ॰पहृते॰** ] $MVK_1L_1P_1$ ; **॰पहते॰** $M^{ka}$

इतश्च नास्ति। स हि (१) समानविषययोर्वा ज्ञानयोरिष्येत (२) भिन्नविषययोर्वा।

### [1.2.2.1 समानविषययोः]

न समानविषययोः, धारावाहिकज्ञानेष्वदृष्टत्वात्।

### [1.2.2.2 भिन्नविषययोः]

नापि भिन्नविषययोः, स्तम्भकुम्भोपलम्भयोस्तदनुपलम्भात्। यदि चोत्तरेण ज्ञानेन पूर्वज्ञानगृहीतादर्थादन्यो ऽर्थ इदानीं गृहीतः, तत्पूर्वं ज्ञानं किमिति बाधितमुच्यते।

### [1.2.3 प्राप्तप्रतिष्ठत्वम्]

अपि च पूर्वस्मिन् प्रत्यये प्राप्तप्रतिष्ठे सत्यागन्तुरुत्तरः प्रत्ययो बाधितुं युक्तः, न पूर्वः। न चैवं दृश्यते।

### [1.2.4 उपसंहारः]

---

**1** *Tātparyaṭīkā* ad *codanā* 57 (58.8–9): **इतश्च नोत्तरेण पूर्वस्य बाधः। न हि तत्पूर्वस्य मिथ्यात्वमवगमयति, अर्थान्तरविषयत्वात्।**
**4 धारावाहिक°** ] Cf. NM I 58.2: **धारावाहिकबोधेषु को ऽधिको ऽर्थः प्रकाशते॥**
**10** *Tātparyaṭīkā* ad *codanā* 57 (58.12–15): **न चोत्तरं प्रत्यक्षं पूर्वगृहीतस्यैवार्थस्याभावग्राहकम्, तस्य भावविषयत्वात्। न चोत्तरमभावाख्यमेव प्रमाणम्, पूर्वस्य सद्भावग्राहिणो विद्यमानत्वात्। सदुपलम्भकप्रमाणप्रत्यस्तमये सति तस्योदयः, न तु पूर्वस्मिन् प्रमाणज्येष्ठे प्रत्यक्षे सति।**

---

**1 °रिष्येत** ] $K_1P_1$ ; **°रिष्यते** $MVL_1$ **4 समान°** ] $MVP_1$ ; **तावत् समान°** $K_1$ ; **समाना°** $L_1$ **4 °विषययोः** ] $MVL_1P_1$ ; **°विषययोर्धयोर्वा** $K_1$ **4 धारावाहिक°** ] $K_1$ ; **धारावाहि°** $MVL_1P_1$ **4 °दृष्टत्वात्** ] $MVL_1P_1$ ; **°दृष्टत्वन्** $K_1$ **6 °विषययोः** ] $MVK_1P_1$ ; **°विषयोः** $L_1$ **6 स्तम्भकुम्भो°** ] $MVL_1^{pc}P_1$ ; **कुम्भो°** $L_1^{ac}$ **7 °ज्ञान°** ] $MK_1L_1P_1$ ; **°ज्ञानेन** $M^{kha}V$ **7 °दन्यो ऽर्थ** ] $K_1P_1$ ; **°दर्थो ऽन्य** $MVL_1$ **8 तत्पूर्वं** ] $L_1P_1$ ; **तत्पूर्व°** $MV$ ; **तत्पूर्वक°** $K_1$ **8 °मुच्यते** ] $MVK_1L_1$ ; **°मुच्येत** $P_1$ **10 °प्तप्रतिष्ठे** ] $MVK_1L_1^{pc}P_1$ ; **°प्तातिष्ठे** $L_1^{ac}$ **11 बाधितुं** ] $MVK_1L_1P_1$ ; **भवितुं** $M^{en}$ **11 पूर्वः। न** ] $MVL_1P_1$ ; **पूर्व** $K_1$

तस्मान्न बाध्यं नाम विज्ञानमस्ति। तदभावान्न तत्साधर्म्यनिबन्धनः संशयः। तदभावात्संवादाद्यनन्वेषणान्न परतः प्रामाण्यम्।

[1.3 **अख्यात्युपवर्णनम्**]

नन्वेवं बाधे निराक्रियमाणे किममी शुक्तिकारजतादिग्राहिणो विपरीतप्रत्यया अबाधिता एवासताम्।

आः कुमते, नामी विपरीतप्रत्ययाः।

[1.3.1 **विपरीतप्रत्ययकारणाभावः**]

न हीदृशानां विपर्ययाणामुत्पत्तौ किमपि कारणमुत्पश्यामः।

[1.3.1.1 **नेन्द्रियं कारणम्**]

न तावदिन्द्रियमेवंविधबोधविधायि भवितुमर्हति, सर्वदा तदुत्पादप्रसङ्गात्।

[1.3.1.2 **न दोषकलुषितमिन्द्रियं कारणम्**]

नापि दोषकलुषितम्। दुष्टं हि कारणं स्वकार्यकरण एव कुण्ठितशक्ति

---

**1** Cf. sections 1.1.1. and 1.1.2.
**6 विपरीत॰** ] Cf. NM I 196.9–10: **विपर्ययो ऽपि विषयग्रहणात्मक एव विपरीतमसन्तं वा विषयं गृह्णाति।**
**6** *Tātparyaṭīkā* ad *codanā* 47 (51.3): **ननु नैव शुक्तिकायां रजतज्ञानमप्रमाणम्** (**॰नमप्रमाणम्** ] ms.; **॰नं प्रमाणम्** ed.)।
**8** *Tātparyaṭīkā* ad *codanā* 47 (51.3–4): **न ह्येकमेवेदं विज्ञानमन्यथा सन्तमर्थमन्यथा बोधयति, तथाविधज्ञानोत्पत्तौ कारणाभावात्।**
**13** Cf. *Bṛhatī* I 67.4: **युक्तं च दुष्टतायाः कार्याक्षमत्वम्, न पुनः कार्या-**

---

**1 तद॰** ] MVL$_1$P$_1$; **तस्माद॰** K$_1$ **2 ॰द्यनन्वेषणान्न** ] MVL$_1$P$_1$; **॰द्यन्वेषणा न** K$_1$ **4 बाधे** ] MK$_1$P$_1$; **बाधे पि** M$^{kha}$VL$_1$ **4 ॰रजतादि॰** ] MVK$_1$L$_1$; **॰रजताकार॰** P$_1$ **6 विपरीत॰** ] MVK$_1$L$_1$; **विपरीताः** P$_1$ **8 हीदृशानां** ] MVL$_1$P$_1$; **हीदृशां** K$_1$ **8 विपर्ययाणा॰** ] MVP$_1$; **विपर्याणा॰** K$_1$; **विपर्ययाना॰** L$_1$ **13 दोष॰** ] MVK$_1$L$_1^{pc}$P$_1$; **विपरीदोष॰** L$_1^{ac}$ **13 हि** ] MK$_1$P$_1$; om. VL$_1$

जातमिति तदेव मा जीजनत्। विपरीतकार्यकरणस्य किं वर्तते। न हि दुष्टानि शालिबीजानि यवाङ्कुरकरणकौशलमवलम्बेरन्।

[1.3.1.3 उपसंहारः]

तस्मात्कारणाभावादपि न विपरीतप्रत्ययास्ते।

[1.3.2 “इदं रजतम्” इति ग्रहणस्मरणे]

तत्किं सम्यक्प्रत्यय एव शुक्तिकायां रजतप्रतिभासः।

अयि मूढ, नायमेकः प्रत्ययः “इदं रजतम्” इति, किं तु द्वे एते ग्रहणस्मरणे। “इदम्” इति पुरोवस्थितभास्वराकारधर्मिप्रतिभासः। “रजतम्” इति भास्वररूपदर्शनप्रबोध्यमानसंस्कारकारणकं तत्साहचर्यावगतरजतस्मरणम्।

[1.3.3 स्मरणमभ्युपगन्तव्यम्]

---

न्तरसामर्थ्यम्।; *Tātparyaṭīkā* ad *codanā* 47 (51.4–6): अदुष्टाद्धि (अदुष्टाद्धि ] ms.; अदुष्टादि° ed.) कारणकलापाद् (कारणकलापाद् ] ms.; कारणाद् ed.) अविसंवादि (अविसंवादि ] ms.; अविसंवादकं ed.) ज्ञानमुत्पद्यते, दुष्टाच्च कार्यानुत्पत्तिः, न तु विपरीतकार्योत्पत्तिः। न हि यवादयो दुष्टाः शाल्यङ्कुरप्रसवसमर्थतामश्नुवीरन्।

1 °करणस्य किं वर्तते ] Cf. NM II 31.2: अन्यस्मिन्नसाधारणे स्वलक्षणे दृष्टे ऽन्यस्मरणस्य किं वर्तते। अस्ति च तत्।

8 *Tātparyaṭīkā* ad *codanā* 47 (51.6–8): तस्माद् विज्ञानद्वयमेतत्। “इदम्” इति पुरोवस्थितार्थग्राहि प्रत्यक्षविज्ञानम् (°विज्ञानम् ] ms.; °ज्ञानम् ed.), “रजतम्” इति चानुभूतस्मरणम्।

---

1 °व मा जीजनत् ] MV$L_1P_1$; °वाजीजनत् $K_1$　1 °करणस्य ] MV$P_1$; °करणे ऽस्य $K_1$; °कारणस्य $L_1$　2 °करण° ] MV$L_1P_1$; °करणे $K_1$　4 विपरीत° ] MV$L_1P_1$; विपरीतः $K_1$　6 °रजतप्रतिभासः ] MV$K_1L_1$; °रजतावभासः $P_1$　7 द्वे ] MV$L_1P_1$; द्वेष $K_1$　8 “इदम्” इति ] MV$K_1L_1P_1^{pc}$; इदमपि $P_1^{ac}$　9 इति ] $P_1$; इति तु MV$K_1L_1$　9 °प्रबोध्य° ] MV$L_1P_1$; °प्रतिबोध्य° $K_1$　10 °र्यावगतर° ] $K_1P_1$; °र्यादवगतर° MV$L_1^{pc}$; °र्यादवर° $L_1^{ac}$

अतश्चेदं स्मरणम्, यतः
(१) प्रागनवगतरजतस्य न जायते,
(२) विदितरजतस्यापि रजन्यामन्यदा वा सादृश्यदर्शनाद्विना न भवतीति।

### [1.3.4 स्मृतिप्रमोषः]

स्मरणमपि भवदिदमात्मानं तथा न प्रकटयतीति प्रमुषितमुच्यते।

### [1.3.5 अनुभवस्मरणविवेकाग्रहणम्]

स्वरूपेण चाप्रतिभासमानायां स्मृतावनुभवस्मरणयोर्विवेको न गृहीतो भवतीत्यग्रहणमख्यातिरुच्यते।

### [1.4 ख्यातिवादविभागः]

तथा हि भ्रान्तबोधेषु प्रस्फुरद्वस्त्वसंभवात्।
चतुष्प्रकारा विमतिरुदपद्यत वादिनाम्॥

विपरीतख्यातिः, असत्ख्यातिः, आत्मख्यातिः, अख्यातिरिति।

---

**1** *Tātparyaṭīkā* ad *codanā* 47 (51.8): अतश्चैतत् स्मरणं येनाननुभूतरजतस्यैतन्नोपपद्यते (स्मरणं येनाननुभूतरजतस्यैतन्नोपपद्यते] ms.; स्मरणमननुभूतस्येत्येतन्नोपपद्यते ed.)।
**9** *Bṛhatī* I 65.3–5: उच्यते। विषयान्तरं सदृशमवलम्ब्यागृहीतविवेकं यज्ज्ञानमुत्पन्नं तत्सदृशविषयान्तरे स्मृतिज्ञानहेतुतां प्रतिपद्यते "स्मरामि" इति ज्ञानशून्यस्य।; *Brahmasiddhi* 137.5: तस्मात् "स्मरामि" इति विवेकशून्या रजतस्मृतिरेषा।
**12** *Vibhramaviveka* 1: आत्मख्यातिरसत्ख्यातिरख्यातिः ख्यातिरन्यथा। परीक्षकाणां विभ्रान्तौ विवादात्सा विविच्यते॥

---

**1** अतश्चेदं] $MVL_1P_1$; अतश्चेमं $K_1$ **3** °रजतस्यापि] $MVK_1L_1P_1^{pc}$; °रजतस्य $P_1^{ac}$ **3** °द्विना] $MK_1L_1P_1$; °दिना $M^{kha}V$ **8** स्मृता°] $MVK_1L_1$; रजतादिस्मृता° $M^{en}$ **9** न गृहीतो] $MVK_1L_1P_1^{pc}$; न गृहीतो न $P_1^{ac}$ **11** भ्रान्त°] $MVK_1L_1$; भ्रान्ति° $P_1$ **11** °त्वसंभवात्] $M^{en}K_1P_1$; °तुसंभवात् $MVL_1$ **12** °रुदपद्यत] $MK_1P_1$; °रुपपद्येत $M^{kha}V$; °रुपपद्यत $L_1$ **13** °तिः, आत्म°] $MVL_1P_1$; °तिरात्मा° $K_1$

### [1.4.1 विपरीतख्यातिः]

तत्र विपरीतख्यातिस्तावत् कारणाभावादेव निरस्ता। अपि च विपरीतख्यातौ त्रयी गतिः।

(१) रजतं वान्यदेशकालमत्रालम्बनम्,

(२) शुक्तिका वा निगूहितनिजाकारा सती परिगृहीतपराकारा च,

(३) अथवान्यदालम्बनमन्यच्च प्रतिभाति—आलम्बनं शुक्तिका, रजतं च प्रतिभातीति।

### [1.4.1.1 प्रथमः पक्षः]

#### [1.4.1.1.1 असत्ख्यातिरेव]

तत्र यदि रजतमालम्बनम्, तदियमसत्ख्यातिरेव न विपरीतख्यातिः, असतस्तत्र प्रतिभासात्।

#### [1.4.1.1.2 अन्यदेशकालं रजतम्]

अथान्यदेशकालं तदस्त्येवेत्यभिधीयते।
इहासंनिहितस्यास्य तेन सत्त्वेन को गुणः॥

---

**2 निरस्ता** ] See section 1.3.1.
**6** Cf. *Bṛhatī* I 58.6–59.5: **को ऽयमन्यथाभावः। अयमन्यथाभावः—शुक्तिका हि रजतवत्प्रकाशते। शुक्तिकालम्बनं हि तज्ज्ञानम्, न रजतालम्बनम्। कथमवगम्यते। शुक्तिकासंप्रयुक्ते चक्षुषि दर्शनात्, अन्धस्यानुत्पादात्। न ह्यन्धः शुक्तिकां रजतमिति व्यपदिशति। चक्षुष्मानेव हि शुक्तिकां रजतमिति मन्यते “रजतसन्निकृष्टं मे चक्षुः” इति। अतः शुक्तिकालम्बनमेतज्ज्ञानम्, न रजतालम्बनम्।**

---

**2 °ख्यातिस्तावत्** ] MVK$_1$L$_1$; **°ख्यातिः** P$_1$ **4 °मत्रा°** ] MVL$_1$P$_1$; **°मात्रा°** K$_1$ **5 °पराकारा** ] K$_1$; **°रजताकारा** MVL$_1$P$_1$ **6 °मन्यच्च** ] MK$_1$L$_1$P$_1$; **°मन्यश्च** V **7 प्रतिभाति—आलम्बनं शुक्तिका, रजतं च प्रतिभातीति** ] M$^{en}$V L$_1$P$_1$; **प्रतिभाति** M; **प्रतिभात्यालम्बनं शुक्तिकाका रजतञ्च प्रतिभातीति** K$_1$ **11 °स्तत्र** ] P$_1$; **°स्तत्र रजतस्य** MVL$_1$; **°स्तस्य रजतस्य** K$_1$

[1.4.1.1.3 **देशकालयोः समानो दोषः**]

अपि च देशकालावपि किं (१) सन्तौ प्रतिभासेते, (२) उतासन्ताविति।

(१) यदि सन्तौ, तर्हि तद्देशकालमेवेदं रजतमवभातमिति न भ्रान्तिरेषा स्यात्।

(२) असन्तौ तु तावपि रजतवन्नालम्बनं भवितुमर्हतः।

[1.4.1.1.4 **स्मृत्युपारूढं रजतम्**]

अथ स्मृत्युपारूढं रजतमस्यां प्रतीतौ परिस्फुरतीत्युच्यते, स्मृत्युपारूढमिति को ऽर्थः। स्मरणमपि हि ज्ञानमेव, तदपि कथमसदर्थविषयं स्यात्।

स्मृतेरनर्थजत्वमेव स्वरूपमिति चेत्।

अस्तु कामम्। तत्सामान्यादत्राप्येवं प्रसङ्ग इत्येतदपि तावन्न ब्रूमः। तया त्वनर्थजन्यया स्मृत्या सो ऽर्थः कथमिह संनिधापयितुं पार्यते। सा हि न स्पृशत्येवार्थम्।

[1.4.1.1.5 **उपसंहारः**]

तस्मादसंनिहितरजतालम्बना विपरीतख्यातिरसत्ख्यातेर्न विशिष्यते।

[1.4.1.2 **द्वितीयः पक्षः**]

---

**2 अपि च देशकालावपि**] MV$K_1L_1$; **अथान्यदेशकालौ प्रतिभासेते** $P_1^{ac}$; **अपि चान्यदेशकालौ प्रतिभासेते** $P_1^{pc}$ **4 तद्देश॰**] MV$K_1L_1P_1$; **उद्देश॰** $M^{ka}$ **4 ॰भातमिति**] MV$K_1L_1$; **॰भातं** $P_1$ **6 तु तावपि**] $K_1$; **तूभावपि** MV$L_1$ $P_1^{pc}$; **भावपि** $P_1^{ac}$ **6 ॰लम्बनं**] MV$K_1L_1$; **॰लम्बनी॰** $P_1$ **8 स्मृत्युपारूढं**] $K_1P_1$; **स्मृत्यारूढं** MV$L_1$ **8 ॰त्युच्यते**] $K_1P_1$; **॰त्युच्यते तर्हि** MV$L_1$ **9 हि**] $K_1P_1$; om. MV$L_1$ **12 ॰दत्राप्येवं**] MV$K_1L_1$; **॰दन्यत्राप्येवं** $P_1$ **12 प्रसङ्ग**] $K_1P_1$; **प्रयोग** MV$L_1$ **13 तया**] $K_1P_1$; **तथा** MV$L_1$ **13 संनिधा॰**] MV$K_1P_1$; **सान्निधा॰** $L_1$ **17 विशिष्यते**] $K_1$; **विशिष्यत एव** MV$L_1P_1$

अथ स्थगितनिजवपुरुपगृहीतपराकारा शुक्तिकात्र प्रतीयत इति नेयमसत्ख्यातिरुच्यते, तदिदमपूर्वं किमपि नाटकमिव “इयमस्मि कृत्या सीता संवृत्ता” इति। तथा हि किमत्र (१) शुक्तिरिति प्रतीतिः, (२) उत रजतमिति।

[1.4.1.2.1 **शुक्तिप्रतीतौ**]

शुक्तिप्रतीतौ भ्रमार्थः कः।

[1.4.1.2.2 **रजतप्रतीतौ**]

रजतप्रतीतौ शुक्तिरसावित्यत्र किं प्रमाणम्।
बाधकप्रत्ययादेवमवगतमिति चेत्।
मैवम्। न हि ज्ञानान्तरेणास्याः प्रतीतेर्विषयो व्यवस्थापयितुं युक्तः। बाधकेन हि ज्ञानेन पूर्वज्ञानगृहीतस्य वस्तुनो ऽसत्त्वं नाम ख्याप्यताम्, न तु तस्य विषयो निरूप्यते। अनर्थित्वात् कस्यचिदप्रवृत्तस्य

---

**3** “**इयमस्मि कृत्या सीता संवृत्ता” इति** ] *Nyāyamañjarīgranthibhaṅga* 78.12–15: **इयमस्मि कृत्या सीता संवृत्तेति। कृत्यारावणाख्यनाटकोक्तं वस्तूपहासपरत्वेन निर्दिशति। तत्र हि जातवेदसा रावणवधाय कृत्योत्थापिता सा रावणागमनसमये स्वरूपतिरोधानेन सीतारूपा संवृत्ता ‘इयमस्मि कृत्या सीता संवृत्ता’ इत्यभिधाय।**
**12** Cf. section 1.2.1.5.

---

**1 °पराकारा** ] $K_1$; **°रजतरूपा** $MVL_1P_1$ **1 शुक्तिकात्र** ] $MVK_1P_1$; **शुक्तिका** $L_1$ **1 प्रतीयत** ] $K_1$; **प्रकाशत** $MVL_1P_1$ **2 नाटकमिव** ] $K_1$; **नाटकम्** $MVL_1P_1$ **2 इयमस्मि** ] $P_1$; **इयमस्मिन्** MV; **इयमस्मिन्सीता°** $K_1$; **इयमस्ति** $L_1$ **3 संवृत्ता” इति** ] $M^{en}$; **प्रवृत्तेति** $MVL_1P_1$ **3 शुक्तिरिति** ] $MK_1P_1$; **शुक्तीति** $M^{kha}VL_1$ **6 शुक्तिप्रतीतौ** ] $K_1$; **शुक्तिकाप्रतीतौ** $MVL_1P_1$ **6 भ्रमार्थः कः** ] $K_1$; **तु शुक्तौ शुक्तिरेव प्रतीयते, न रजतं इति भ्रमार्थः कः** M; **तु शुक्तिरेव न रजतमत्र भ्रमार्थः कः** V; **तु शुक्तिरेव न रजतमभ्रमार्थः कः** $L_1$; **को भ्रमार्थः** $P_1$ **8 रजतप्रतीतौ** ] $K_1$; **रजतप्रतीतौ तु** $MVL_1P_1$ **9 °वमवगतमिति** ] $MK_1P_1$; **°वमधिगतमिति** $VL_1$ **12 अनर्थित्वा°** ] $MVK_1P_1$; **अनर्थितत्वा°** $L_1$ **12 °त् कस्यचिदप्रवृत्तस्य** ] $K_1$; **°द्वा कदाचिदप्रवृत्तस्य** $MVL_1$; **°द्वा कस्यचिदप्रवृत्तस्य** $P_1$

पुंसो बाधकानुत्पत्तौ को ऽस्याः प्रतीतेर्विषयं व्यवस्थापयति।

[1.4.1.2.3 उपसंहारः]

तस्माद्यदेवास्यां चकास्ति, तदेव रजतमस्या विषय इति वक्तुं युक्तम्। शुक्तिस्तु निगूहितनिजवपुरिति दुर्विदग्धवाचोयुक्तिरियम्।

[1.4.1.3 तृतीयः पक्षः]

ये त्वालम्बनतां शुक्ते रजतस्यावभासनम्।
वदन्त्यस्मिन् भ्रमज्ञाने, तेषामतितरां भ्रमः॥
न ह्यालम्बनता युक्ता संनिधाननिबन्धना।
तत्रैव भूप्रदेशस्य तथाभावप्रसङ्गतः॥
तदेवालम्बनं बुद्धेर्यदस्यामवभासते।
अन्यदालम्बनं चान्यद् भातीति भणितिर्नवा॥

[1.4.1.4 उपसंहारः]

अतो रजतमेवैतद् बुद्धिग्राह्यमसच्च तत्।
एवं विपर्ययख्यातिरसत्ख्यातेर्न भिद्यते॥

[1.4.2 असत्ख्यातिः]

तत्किमसत्ख्यातिरेव साधीयसी। तामेवाभ्युपगच्छामः।

---

**11** Cf. *Bṛhatī* I 60.7–61.4: नन्वालम्बनज्ञानपक्षे ऽप्यन्याकारस्य विज्ञानस्यान्याकारमालम्बनमिति नोपपद्यते। इदमेव ह्यालम्बनस्यालम्बनत्वं यद्बुतात्माकारमेव ज्ञानमुत्पादयतीति। अन्यथा हि चक्षुरादिवद् व्यापृतस्यापि ज्ञानोत्पत्तावालम्बनव्यपदेशो न स्यात्।; *Vibhramaviveka* 39: अन्यस्याप्यन्यथाख्यातिरत एव न युज्यते। अन्यत् प्रकाशते चान्यद् ग्राह्यमित्यतिदुर्घटम्॥

---

**1** °त्पत्तौ ] $VK_1L_1P_1$ ; °त्पत्तौ वा M **1** व्यवस्थापयति ] $K_1$ ; व्यवस्थापयिष्यति $MVL_1P_1$ **4** वक्तुं युक्तम् ] $K_1$ ; युक्तं वक्तुम् $MVL_1P_1$ **4** दुर्विदग्ध° ] $MVL_1P_1$ ; दुर्विदग्धा $K_1$ **6** °लम्बनतां ] $MVL_1P_1$ ; °लंबनता $K_1$ **10** °र्यद° ] $MVL_1P_1$ ; °र्यद्य° $K_1$ **16** °तिरेव साधीयसी तामेवा° ] $MVL_1P_1$ ; °तेरेव साधीयतामेवा° $K_1$

मैवम्। सापि नोपपद्यत एव।

### [1.4.2.1 असदर्थनिरूपणम्]

असत्ख्यातिरिति को ऽर्थः। किम् (१) एकान्तासत एवार्थस्य प्रथनम्, (२) अथ देशान्तरादौ विद्यमानस्येति।

### [1.4.2.1.1 देशान्तरादौ विद्यमानस्य प्रथनम्]

उत्तरस्मिन् पक्षे विपरीतख्यातिरेवेयम्, परैरपि रजतस्य तत्रासत्त्वाभ्युपगमात्, देशान्तरादौ तत्सत्तायास्त्वयापि प्रतिपन्नत्वात्।

### [1.4.2.1.2 एकान्तासतः प्रथनम्]

एकान्तासतस्त्वर्थस्य ख्यातिरिति न पेशलम्, आकाशकमलिनीपल्लवादेरप्रतिभासात्।

### [1.4.2.2 न वासनाभ्यासात्]

वासनाभ्यासादसतामपि प्रतिभासो भविष्यतीति चेत्।

---

**9** Cf. *Vibhramaviveka* 2ab: **असच्चकास्ति न व्योमकुसुमं**; 37–38ab: **असतो भासनायोगाद् विरोधात्संविदो ऽपरः। अवोचन्निपुणंमन्यो विभ्रमं सम्यगग्रहम्॥ न किंचिद् भासते चेति विरुद्धमिव दृश्यते।**
**12** Cf. *Bṛhatī* I 69.6–10: **स्वप्नादिषु पुनः कस्यचिदग्रहणादर्थान्तरे स्मृत्युद्बोधपरिहारः शक्य इव प्रतिभाति। तस्माद्वासनानिबन्धनमेवेदं ज्ञानजालमिति प्र-**

---

**3 असत्ख्यातिरिति** ] MVK$_1$L$_1$P$_1^{pc}$; **असत्ख्याति** P$_1^{ac}$ **3 एकान्तासत** ] MVK$_1$L$_1$P$_1^{pc}$; **एकार्थासत** P$_1^{ac}$ **4 प्रथनम्** ] MVK$_1$P$_1$; **प्रपन्नं** L$_1$ **4 विद्यमानस्येति** ] MVK$_1$P$_1$; **इवास्यमानस्येति** L$_1$ **6 °रेवेयम्** ] K$_1$P$_1$; **°रेवैषा** MVL$_1$ **6 रजतस्य तत्रा°** ] K$_1$; **तत्र रजतस्य** MVL$_1$; **तत्र रजतस्या°** P$_1$ **7 °सत्त्वाभ्युपगमात्** ] M$^{ka}$K$_1$L$_1$P$_1$; **सत्त्वानभ्युपगमात्** MV **7 देशान्तरादौ** ] K$_1$; **देशान्तरादौ तु** MVL$_1$; **देशान्तरादौ च** P$_1$ **7 तत्सत्ता°** ] MVK$_1^{pc}$L$_1$P$_1$; **तस्यत्सत्ता°** K$_1^{ac}$ **9 °तस्त्वर्थस्य ख्यातिरिति** ] K$_1$L$_1$P$_1$; **°तस्त्वस्य ख्यातिरिति** MV; **°तस्त्वर्थस्य खातिरेव** M$^{en}$ **9 °कमलिनी°** ] K$_1$P$_1$; **°नलिनी°** MVL$_1$ **10 °भासात्** ] K$_1$P$_1$; **°भासनात्** MVL$_1$ **12 प्रतिभासो भविष्यतीति** ] K$_1$; **प्रतिभासा भविष्यन्तीति** MVL$_1$P$_1$

न, अर्थमन्तरेण वासनाया अप्यनुपपत्तेः। अर्थानुभवसमाहितः संस्कारो वासना कथ्यते। सा कथमसदर्थप्रतिभासहेतुः स्यात्।

### [1.4.2.3 नियमाभावः]

भवत्वन्या वा भवदभिमता काचन वासना। सापि त्वसत्त्वाविशेषे किमिति रजतमतिमुपजनयति न गगननलिनप्रतीतिमिति कुतस्त्यो नियमः। तदलमनया।

### [1.4.2.4 अत्यन्तासतः सामर्थ्याभावः]

नात्यन्तमसतो ऽर्थस्य सामर्थ्यमवकल्पते।
व्यवहारधुरं वोढुमियतीमनुपप्लुताम्॥

### [1.4.2.5 विपरीतख्यातेरविशेषः]

---

तिपद्यामहे। सदृशदर्शनात्सदृशे ऽर्थान्तरे स्मृतेरुद्बोधः, स्वप्ने पुनः कस्यचिदग्रहणादित्युक्तम्। तस्माद्वासनैव निमित्तमिति लघ्वी कल्पना। नार्थान्तराश्रयणम्, अव्याप्तेः।; 71.6–8: तस्माद् व्यामोहहेतवो मिथ्याप्रत्ययाः, व्यामोहनिबन्धनाश्च सांसारिक्यो वासनाः। अतो वासनानिबन्धनमेवेदं ज्ञानजालमुदितं तत्त्वविद्भिः।

**1** Cf. *Bṛhatī* I 69.12–70.8: स्वप्नादिषु च बहिरवभासा संवित्। सा च बाह्यमर्थमन्तरेण न संभवति। येन च विना यन्न संभवति, तत्तस्य कारणम्। तस्मादर्थ एव कारणमिति युक्तं कल्पयितुम्।

**2** Cf. *Ślokavārttika nirālambana* 181ab: संवित्त्या जायमाना हि स्मृतिमात्रं करोत्यसौ (=वासना)।

**4 भवत्व॰** ] *Nyāyamañjarīgranthibhaṅga* 78.16–17: भवत्वित्यादि। अनाद्यविद्यायाता असत्यरूपप्रदर्शनशक्तिर्विज्ञानस्य वासना यत्सम्बन्धादात्मानं प्रदर्शयद् विज्ञानमसन्तमपि बाह्याकारं दर्शयतीति बौद्धाः।

---

**1 वासनाया** ] $MVK_1P_1$; **वासनया** $L_1$ **1 ॰हितः संस्कारो** ] $K_1$; **॰हितो हि संस्कारो** $MVL_1P_1$ **4 वा** ] $MVL_1P_1$; **भा** $K_1$ **4 वासना। सापि** ] $MK_1L_1P_1$; **वासनाऽपि** $M^{kha}V$ **4 त्वसत्त्वा॰** ] $MVL_1P_1$; **त्वसत्ता॰** $M^{ka}$; **त्वसत्त्वत्वा॰** $K_1$ **5 ॰मति॰** ] $MK_1L_1^{pc}P_1$; **॰मिति॰** $M^{ka}M^{kha}VL_1^{ac}$ **5 ॰नलिन॰** ] $MVL_1$; **॰नळिन॰** $K_1$; **॰कमलिनी॰** $P_1$ **5 कुतस्त्यो** ] $MVK_1L_1$; **कुतस्त्यो यं** $P_1$ **6 तदलमनया** ] $MVK_1L_1P_1^{pc}$; **तदयमनया** $P_1^{ac}$

अपि चासत् सत्त्वेन प्रतिभातीत्यसत्ख्यातिरपि न विपरीतख्यातिमतिवर्तते।

[1.4.3 आत्मख्यातिः]

तस्माद्दूरमात्मख्यातिरस्तु।

[1.4.3.1 तदुपन्यासः]

विज्ञानमेव खल्वेतद् गृह्णात्यात्मानमात्मना।
बहिर्निरूप्यमाणस्य ग्राह्यस्यानुपपत्तितः॥
बुद्धिः प्रकाशमाना च तेन तेनात्मना बहिः।
उद्वहत्यर्थशून्यापि लोकयात्रामिहेदृशीम्॥

[1.4.3.2 तन्निरासः]

उच्यते। नात्मख्यातिरपि युक्तिमती।

[1.4.3.2.1 अहं रजतमिति प्रतीतिः]

विज्ञानात्मनो हि प्रतिभासे "अहं रजतम्" इति प्रतीतिः स्यात्, न "इदं रजतम्" इति।

[1.4.3.2.2 विपरीतख्यातिरेव स्यात्]

किं च—

---

1 *Vibhramaviveka* 122cd–123a: अभावो भावरूपेण भातीति यदि मन्यते॥ अन्यथाख्यातिरेवेष्टा.

---

**1 चासत् सत्त्वेन** ] $M^{en}K_1P_1$; **च सत्त्वेन** ] MV; **चासत्त्वेन** $M^{ka}L_1$ **1 °त्यसत्ख्याति°** ] $MK_1L_1P_1$; **°ति अख्याति°** $M^{kha}$; **°ति अत्ख्याति°** V **4 °दूर°** ] $MVL_1P_1$; **°द्वार°** $K_1$ **7 °पपत्तितः** ] $MVL_1P_1$; **°पपत्तिः** $K_1$(unmetrical) **9 उद्वह°** ] $MK_1L_1P_1$; **तद्वह°** $M^{kha}V$

यदन्तर्ज्ञेयरूपं हि बहिर्वदवभासते॥

इत्यभ्युपगमादियमपि विपरीतख्यातिरेव स्यात्।

### [1.4.3.2.3 असत्ख्यातिरपि भवति]

असत्ख्यातिरपि चेयं भवत्येव, बहिर्बुद्धेरसंभवात्।

बुद्धिरस्त्येवेति चेत्।

बहिष्ट्वं तर्हि चिन्त्यं सदसद्वेति।

(१) न तावत्सत्, बुद्धेर्बाह्यत्वाभावात्।

(२) असत्त्वे त्वसत्ख्यातिरित्युक्तमेव।

### [1.4.4 अख्यातिः]

तस्मात्ख्यातित्रये ऽप्यस्मिन्नन्योन्यानुप्रवेशिनि।
युक्त्या विरुध्यमाने च श्रेयस्यख्यातिरेव सा॥

ख्यातित्रयवादिभिरपि चेयमप्रत्याख्येया नूनमख्यातिः।

### [1.4.4.1 आत्मख्यातौ]

आत्मख्यातौ तावदात्मतया विज्ञानस्य ख्यातिर्नास्ति, विच्छेदप्रतिभासाद् इत्युक्तत्वात्।

---

**1 यदन्तर्ज्ञेयरूपं हि** ] *Nyāyamañjarīgranthibhaṅga* 78.18–20: **यदन्तर्ज्ञेयरूपं हीत्यस्योत्तरम्—'सोऽर्थो विज्ञानरूपत्वात् तत्प्रत्ययतयापि वा' इति। तदेव विज्ञानं प्रत्ययः कारणं यस्यासौ तत्प्रत्ययः, तस्य भावः तत्प्रत्ययता, तया।**
**1** *Ālambanaparīkṣā* 6ab
**4 बहिर्बुद्धेरसंभवात्** ] *Nyāyamañjarīgranthibhaṅga* 78.20–21: **बहिर्बुद्धेरसम्भवादिति। बहिष्प्रतिभासस्तावदवश्याभ्युपेयः, बहिश्च बुद्धिर्नास्तीति बलादसत्ख्यातिवादापत्तिः।**
**15 इत्युक्तत्वात्** ] See section 1.4.3.2.1.

---

**1 ०र्ज्ञेयरूपं** ] MV$L_1P_1$; **०र्ज्ञेयं रूपं** $K_1$ **1 बहिर्वदव०** ] MV$K_1L_1P_1^{pc}$; **बहिर्वदा०** $P_1^{ac}$(unmetrical) **4 ०रसंभवात्** ] $K_1$; **०रसत्त्वात्** MV$L_1P_1$ **6 सदसद्वेति** ] M$K_1L_1P_1$; **सदसत्त्वादिति** $M^{kha}$V **8 ०त्युक्तमेव** ] $K_1P_1$; **०त्युक्तम्** MV$L_1$ **11 ०ख्यातिरेव सा** ] MV$K_1L_1^{pc}P_1$; **०ख्यातिर्नास्तिविच्छेरेव सा** $L_1^{ac}$(unmetrical)

### [1.4.4.2 असत्ख्यातौ]

असत्ख्यातावप्यसत्त्वमर्थस्य नैव प्रतिभासते, प्रवृत्त्यादिव्यवहारोच्छेदप्रसङ्गात्।

### [1.4.4.3 विपरीतख्यातौ]

विपरीतख्यातावपि

(१) रजतस्य नासंनिहितस्य ज्ञानजनकत्वम्

(२) अजनकस्य च प्रतिभासो नेष्यत एव।

तत्र स्मृत्युपस्थापितं रजतमवगतिजनकमुपगतम्। अतश्च रजतस्मृतिरपरिहार्या। सा च रजतस्मृतिर्न तदानीं स्वेन रूपेण प्रकाशते, “स्मरामि” इति प्रत्ययाभावात्।

तस्मात् प्रमुषितामेनां स्मृतिमिच्छन्ति तार्किकाः।

---

**6** Cf. *Ślokavārttika nirālambana* 115cd–116ab: कथमुत्पादयेज्ज्ञानं तत्रासंश्चेत्, कुतो न्वियम्॥ अर्थस्याविद्यमानस्य विज्ञानोत्पत्त्यशक्तता।

**11** तस्मात् ··· तार्किकाः ] *Nyāyamañjarīgranthibhaṅga* 78.22–23: तस्मात् प्रमुषितामेनां स्मृतिमिच्छन्ति तार्किकाः। अभ्यस्ते विषये ऽविनाभावस्मृतिवदिति योजना।; cf. *Bṛhatī* I 68.12–13: ननु शुक्तिकायां रजतज्ञानम् “स्मरामि” इति प्रमोषात् स्मृतिज्ञानमुक्तम्। युक्तं रजतादिषु।; 73.7: उक्तम् “स्मरामि” इति स्मृतिप्रमोषात् प्रत्यक्षसंमतं (॰संमतं] em.; ॰संमितं ed.) तत्।; *Vibhramaviveka* 46cd: [स्मरामीति च प्रमोषात्] प्रायेणाध्यक्षविभ्रमः॥; 17–18a (where the Asatkhyātivādin criticizes other theories): प्राक्तत्त्वज्ञानसंस्कारस्, तत्प्रबोधः सकारणः। स्मरामीति प्रमोषः, स हेतुरिन्द्रिययोगिनः॥ भ्रान्तौ.

---

**6** नासंनिहितस्य ] $K_1P_1$; संनिहितस्य MV; सन्निहित॰ $L_1$ **6** ज्ञानजनकत्वम् ] $MVL_1P_1$; जनकत्वम् $K_1$ **8** तत्र ] $VK_1L_1P_1$; अतस्तत्र रजत॰ M **9** सा च ] $MVL_1P_1$; न च $K_1$ **9** ॰तिर्न तदानीं ] $P_1$; ॰तिर्न तदा $MVL_1$; ॰तिर्नेदानीं $K_1$ **9** प्रकाशते ] $MVK_1P_1$; प्रकाशयती $L_1$

अभ्यस्ते विषये लिङ्गप्रतिबन्धस्मृतिं यथा॥

### [1.4.4.4 अख्यातिरिष्यते]

सो ऽयं स्मृतिप्रमोषस्तत्त्वाग्रहणमख्यातिरुच्यते।
एवं सतीयमख्यातिरिष्यते सर्ववादिभिः।
तथा प्रकटयद्भिस्तु पीतं प्राभाकरैर्यशः॥

## [1.5 अख्यातिसमर्थनम्]

### [1.5.1 स्पष्टतया न गृह्यते]

ननु "रजतम्" इति स्मृतेः स्वरूपोल्लेखो मा भूत् । "इदम्" इत्यत्र पुरोवस्थितधर्मिप्रतिभासात् कथमख्यातिः।
उच्यते। न पुरोवस्थितो धर्मी "शुक्तिकेयम्" इति स्पष्टतया गृह्यते, तथाभ्युपगमे भ्रमाभावप्रसङ्गात्।

### [1.5.2 विवेकाग्रहणम्]

किं तु तेजस्वितादिधर्मपरीतं धर्मिमात्रमवभासते। धर्मसारूप्याच्च तदानीं रजतं स्मर्यते। ते एते ग्रहणस्मरणे विविक्ते अपि विविक्ततया

---

**14** Cf. *Brahmasiddhi* 137.1–3: **इदं शुक्तिसंनिकृष्टे चक्षुषि रजतमिति स्मृतिः सामान्यग्रहणात्। भ्रान्तिस्तर्हि कथम्। प्रत्यक्षस्मर्यमाणयोर्विवेकाग्रहणात्।**; 138.8–9: **शुक्तिकाशकले तु रजतसाधारणशुक्लभास्वररूपमात्रप्रतीतेर्विशेषाप्रत्ययाच्च स्मृतिविपरिवर्तिनो रजताद्विवेकाग्रहणात् प्रवृत्तिः।**

---

**1 अभ्यस्ते विषये** ] $MVL_1P_1$ ; **अभ्यस्तविषये** $K_1$ **1 लिङ्ग॰** ] $MVL_1P_1$ ; **लिङ्गे** $K_1$ **1 प्रतिबन्ध॰** ] $MK_1P_1$ ; **॰प्रतिबन्धां** $M^{kha}V$ ; **॰प्रतिबन्धा** $L_1$ **1 स्मृतिं यथा** ] $MVL_1P_1$ ; **स्मृतिर्यथा** $K_1$ **3 ॰तत्त्वा॰** ] $MVK_1P_1$ ; **॰सत्त्वा॰** $L_1$ **8 रजतम्** ] $MVL_1P_1$ ; **रजम्** $K_1$ **8 भूत्** ] $MVL_1P_1$ ; **भूदिति** $K_1$ **9 ॰त्यत्र** ] $MVK_1L_1$ ; **॰त्यत्र तु** $P_1$ **9 कथमख्यातिः** ] $MVK_1P_1$ ; **कख्याति** $L_1$ **10 पुरोवस्थितो** ] $VK_1L_1P_1$ ; **पुरोवस्थित॰** M **11 तथाभ्युपगमे** ] $K_1P_1$ ; **तथा चाभ्युपगमे** $MVL_1$ **11 भ्रमाभाव॰** ] $MVL_1P_1$ ; **भ्रताव॰** $K_1$ **13 तेजस्वित्वादिधर्म॰** ] $K_1P_1$ ; **तेजस्वितादि॰** $MVL_1$ **13 ॰परीतं** ] $K_1L_1P_1$ ; **॰विशिष्टं** M; **॰विपरीतं** V **14 विविक्ततया** ] $MVK_1P_1$ ; **विविक्तया** $L_1$

न गृह्येते इति विवेकाग्रहणमख्यातिः, न तु सर्वेण सर्वमप्रतिपत्तिरेव। व्यधिकरणयोश्च ग्रहणस्मरणयोर्वैयधिकरण्यं चेन्न गृहीतम्, किमन्यदस्तु सामानाधिकरण्यात्। न तु “यदेवेदं तदेव रजतम्” इति सामानाधिकरण्येन ग्रहणमस्ति। सा हि विपरीतख्यातिरेव स्यात्।

[1.5.3 अग्रहणात्प्रवृत्तिः]

वैयधिकरण्यानुपग्रहादेव प्रमातुः प्रवृत्तिः। अविवेकात्सामानाधिकरण्याभिमानेन प्रवृत्तिरिति फलत इयं वाचोयुक्तिः।

[1.5.4 परामर्शवादिमतनिरासः]

सामानाधिकरण्येन केचित् तत्पृष्ठभाविनम्।
परामर्शमपीच्छन्ति तन्न श्रदध्महे वयम्॥

---

**1 सर्वेण सर्वम॰** ] *Nyāyamañjarīgranthibhaṅga* 78.24: **सर्वेण सर्वं सर्वात्मना।**
**7** Cf. *Bṛhatī* I 66.7–8: **कथं तर्हि विपर्ययः। “अग्रहणादेव” इति वदामः।**; *Brahmasiddhi* 137.3–4: **सो ऽयं भेदाग्रहणे ऽभेदग्रहणाभिमानो विवेकरहितानाम्।**
**10 सामानाधिकरण्येन केचित्** ] *Nyāyamañjarīgranthibhaṅga* 78.25–79.2: **सामानाधिकरण्येन केचिदिति। “यदा वैयधिकरण्यानवभासस्तदा सामानाधिकरण्यभ्रमः, तन्निबन्धनः परामर्शोऽपि ‘तथा चेदं रजतजातीयम्’ इति यदि भवेत्तथाऽपि नास्मत्पक्षक्षतिः। प्रवृत्त्यादिव्यवहारवत् सोऽपि भवतु यद्यनुभूयते” इति केचित् प्राभाकराः। रजतज्ञानानन्तरं तदुपकारितास्मरणम्, ततः परामर्शः।**; cf. also section 2.1.6: **तत्पृष्ठभाविपरामर्शवादिनो** ⋯

---

**1 विवेका॰** ] $MVK_1P_1$; **विका॰** $L_1$ **1 सर्वम॰** ] $K_1P_1$; **सर्वा॰** ] $M^{kha}VL_1$; **सर्वात्मना ऽ॰** M **2 ॰पत्तिरेव** ] $MVK_1L_1P_1$; **॰पद्यत एव** $M^{ga}$ **2 ॰धिकरण्यं** ] $MVL_1P_1$; **॰धिकरणञ्** $K_1$ **2 चेन्न** ] $MVK_1L_1P_1$; **चेति** $M^{ka}$ **3 ॰करण्यात्** ] $M^{ka}M^{kha}VK_1L_1P_1$; **॰करण्यम्** M **7 ॰नुपग्रहादेव** ] $MVL_1P_1^{pc}$; **॰नुपग्रहणादेव** $K_1$; **॰नुग्रहादेव** $P_1^{ac}$ **8 ॰त्सामानाधिकरण्या॰** ] $M^{en}K_1P_1$; **॰त्साधारण्या॰** $MVL_1$ **8 ॰भिमानेन** ] $MVL_1P_1$; **॰भिमानेन इ॰** $K_1$ **8 फलत** ] $MVK_1P_1$; **फलया** $L_1$

अख्यातिपक्ष एवं हि हीयेतैकत्ववेदनात्।
वक्रैश्च वितथाख्यातिरक्षरैः कथिता भवेत्॥

### [1.5.5 बाधकप्रत्ययसमर्थनम्]

नन्वेवमख्यातिपक्षे प्रतिष्ठाप्यमाने "नेदं रजतम्" इति पूर्वावगत-रजतप्रतिषेधबोधी बाधकप्रत्ययो दृश्यमानः कथं समर्थयिष्यते। अप्रतीतिज्ञो देवानां प्रियः। न ह्यनेन रजतनिषेधो विधीयते "नेदं रजतम्" इति, किं तु प्रागगृहीतो विवेकः प्रख्याप्यते। "नेदं रजतम्"—"यदेवेदं तदेव रजतम्—इत्येतन्न", "इदमिदम्, रजतं रजतम्"। एतदुक्तं भवति—"इदमन्यत्, रजतमन्यत्" इति। सोऽयं विवेकः ख्यापितो भवति।

### [1.5.6 स्वप्नज्ञानसमर्थनम्]

नन्वेवम् "इदं रजतम्" इत्यादौ स्मरणानुभवयोर्भवतु विवेकाग्रहणम्। स्वप्ने तु कथमेतद् भविष्यति।

भीरो, किं जातं स्वप्ने।

विवेकेन न गृह्येते स्मरणानुभवौ क्वचित्।
स्वप्ने तु स्मृतिरेवैका तथात्वेन न गृह्यते॥

सदृशदर्शनाद्विना स्मृतिरेव कुतस्त्येति चेत्।

---

**16** Cf. section 2.1.9.

---

**1 हीयेतै॰** ] $MVP_1$; **हीयतै॰** $L_1$ **2 वक्रैश्च** ] $MVL_1P_1$; **वक्रैस्तु** $K_1$ **2 वितथा॰** ] $MVL_1P_1$; **वितथ॰** $K_1$ **5 ॰प्रतिषेध॰** ] $MK_1L_1P_1$; **॰प्रतिबोध॰** $M^{kha}V$ **5 समर्थयिष्यते** ] $ML_1P_1$; **समर्थ इष्यते** $M^{kha}V$; **समाधायिष्यते** $K_1$ **7 विधीयते "नेदं रजतम्" इति** ] $K_1P_1$; **विधीयते** $MVL_1$ **7 नेदं** ] $MVL_1P_1$; **इदं** $K_1$ **8 ॰त्येतन्न** ] $MVL_1P_1$; **॰त्येवन्न** $K_1$ **9 रजतं रजतम्** ] $MVL_1P_1$; **रजतं** $K_1$ **9 एतदुक्तं** $VK_1L_1P_1$; **इत्येतदुक्तं** M **10 ख्यापितो** ] $MK_1L_1P_1$; **ख्यातितो** $M^{kha}V$ **14 स्वप्ने** ] $MVL_1P_1$; **लोके स्वप्ने** $K_1$ **15 विवेकेन न** ] $MVL_1P_1$; **विवेकेन** $K_1$(unmetrical) **15 गृह्येते** ] $MVL_1P_1$; **गृह्यते** $K_1$

न। नानाकारणकत्वात् स्मरणानां निद्राकषायितमप्यन्तःकरणं स्मरणकारणं भवत्येव।

[1.5.7 **द्विचन्द्रादिप्रत्ययसमर्थनम्**]

यद्येवं द्विचन्द्रतिक्तशर्करादिप्रत्ययेषु कथं स्मृतिप्रमोषः।
आः कुण्डशेखर, कथमसकृदभिहितमपि न बुध्यसे।

न सर्वत्र स्मृतेरेव प्रमोषो ऽभ्युपगम्यते।
किं त्वख्यातिर्, अतश्चासौ कथंचित् कस्यचित् क्वचित्॥
भवत्यनुभवस्मृत्योर्विवेकाग्रहणं क्वचित्।
क्वचित्तु स्मरणस्यैव तथात्वेनानुपग्रहः॥

[1.5.7.1 **द्विचन्द्रप्रत्ययः**]

द्विधा कृता क्वचिद्वृत्तिर् नेत्रस्य तिमिरादिना।
न हि ग्रहीतुमैक्येन शक्नोति शिशिरत्विषम्॥

[1.5.7.2 **तिक्तशर्कराप्रत्ययः**]

---

**1** Cf. *Śābarabhāṣya* ad 1.1.4a (F 28.8–9): **सनिद्रस्य मनसो दौर्बल्यान्निद्रा मिथ्याभावस्य हेतुः स्वप्नादौ स्वप्नान्ते च।**; *Bṛhatī* I 72.2–7: **ननु "स्मृतेरुद्बोधकारणासंभवान्नैतत्संभवति" इत्युक्तम्। तदसिद्धम्, स्वप्नादावपि हि चिन्तादृष्टादिसंभवात्। स्वप्ने ऽपि हि सुखदुःखमनुभूयते। सुखदुःखहेतुश्चादृष्टम्। अतो ऽदृष्टहेतुकमेव स्वप्नादिज्ञानम्, किंचिच्चिन्तादिहेतुकम्—इत्युपपन्नं शुक्तिकादिज्ञानतुल्यत्वं स्वप्नादिज्ञानस्य। तदिदमुक्तम्—"स्तम्भः" इति जाग्रतो बुद्धिः सुपरिनिश्चिता कथं विपर्यसिष्यति—इति।**; *Vibhramaviveka* 46ab: **सदृशादृष्टचिन्ताद्याः स्मृतिबीजस्य बोधकाः।**
**12** Cf. section 2.1.10.

---

**1 स्मरणानां** ] $K_1P_1$; **स्मरणस्य** $MVK_1L_1$; **स्मरणाभावस्य** $M^{en}$ **4 यद्येवं द्विचन्द्र॰** ] $MVL_1P_1$; **द्विचन्द्र॰** $K_1$ **5 आः** ] $MVK_1P_1$; **आ** $L_1$ **6 न सर्वत्र** ] $MVL_1P_1$; **सर्वत्र** $K_1$(unmetrical) **7 किं त्व॰** ] $MVK_1P_1$; **किन्तु** $L_1$ **7 ॰र्, अतश्चासौ** ] $MVL_1P_1$; **॰रनन्तासौ** $M^{en}$; **॰तरश्चासौ** $K_1$ **9 स्मरणस्यैव** ] $K_1P_1$; **स्मर्यमाणस्य** $MVL_1$

क्वचिद्रसनसंपृक्तपित्ततिक्तत्ववेदनात्।
परिच्छेतुं न शक्नोति माधुर्यं शर्करागतम्।
गृह्णाति यत्तु तिक्तत्वं वस्तुतः पित्तवृत्ति तत्।
तथा तु न विजानाति निगिरन्नेष शर्कराम्॥

[1.5.7.3 पीतशङ्खादिप्रत्ययाः]

एतेन पीतशङ्खादिख्यातयो ऽपि व्याख्याताः।

[1.6 उपसंहारः]

तदेवं सति सर्वत्र सम्यगग्रहणं भ्रमः।
न मिथ्याप्रत्ययः कश्चिदस्ति शङ्कानिबन्धनम्॥
अजातमिथ्याशङ्कश्च न संवादमपेक्षते।
तस्मान्न कश्चित्परतः प्रामाण्यमधिगच्छति॥
एवं स्वतः प्रमाणत्वे सिद्धे वेदे ऽपि सा गतिः।
अपवादद्वयाभावो वक्तव्यश्चात्र पूर्ववत्॥

[2 सिद्धान्तः]

अत्र प्रतिविधीयते।

[2.1 अख्यातिदूषणम्]

---

**1** Cf. section 2.1.11.
**6 एतेन पीतशङ्खादिख्यातयो** ] *Nyāyamañjarīgranthibhaṅga* 79.3–4: **एतेन पीतशङ्खादिभ्रान्तय इति। कामलोपहतं चक्षुः स्वगतं पीतत्वं गृह्णच्छङ्खगतं शुक्लत्वं ग्रहीतुं न शक्नोति स्वगतं च पीतत्वं स्वगतत्वेन न गृह्णाति।**
**9** Cf. sections 1.1.2, 1.1.2, 1.2.4.
**13 पूर्ववत्** ] NM I 432.13–14: **यत्र पुनरिदमपवादद्वयमपि न दृश्यते तत्र तदौत्सर्गिकं प्रामाण्यमनपोदितमास्त इति** …

---

**1 °द्रसन°** ] MV$K_1P_1$; **°दमर°** $L_1$ **1 °संपृक्तपित्त°** ] $K_1P_1$; **°संपृक्ते पित्ते** MV$L_1$ **3 °वृत्ति** ] $K_1P_1$; **°वर्ति** MV$L_1$ **8 भ्रमः** ] MV$K_1^{pc}L_1P_1$; **भ्रमणः** $K_1^{ac}$(unmetrical) **9 निबन्धनम्** ] MV$L_1P_1$; **निबन्धनः** $K_1$ **10 संवाद°** ] MV$L_1P_1$; **संवेद°** $K_1$

[2.1.1 न ज्ञानद्वित्वम्]

यदुक्तम्—"इदं रजतम्" इति स्मरणानुभवस्वभावे विवेकेनागृह्यमाणे द्वे एते ज्ञाने इति, तदसांप्रतम्, प्रत्यभिज्ञावदेकत्वेनैव संवेद्यमानत्वात्। यदेवेदं पुरोवस्थितं भास्वररूपाद्यधिकरणं धर्मिसामान्यम्, तदेव रजतमिति विशेषतः प्रतिपद्यते—"यदिदमग्रतः स्थितं तद् रजतम्" इति सत्यरजतप्रतीतिवत्। अनुभूततया हि न रजतमत्र प्रकाशते, किं त्वनुभूयमानतया। अनुभूतताग्रहणं च स्मरणमुच्यते, नानुभूयमानताग्रहणम्।

[2.1.2 रजतसंवित्तिनिरूपणम्]

स्वप्रकाशा च संवित्तिरिति भवतां दर्शनम्। तत्रैषा रजतसंवित्तिः केन रूपेण प्रकाशतामिति चिन्त्यम्।

(१) यदि स्मरणात्मना, कः प्रमोषार्थः।

---

**2 यदुक्तम्** ] See section 1.3.2.

**4** Cf. *Vibhramaviveka* 119cd–120ab: **सामानाधिकरण्येनामुखरूप्यप्रतीतितः॥ अभिन्नैका च सा संवित्कं पक्षमपबाधताम्।**

**6** *Tātparyaṭīkā* ad *codanā* 47 (51.9–12): **तदेतदपरामृष्टसंविद्विलसितम्। अपरोक्षतया ह्यत्र रजतमवभासते "रजतमिदम्" इति, नानुभूततया। अनुभवावस्थायां चानुभूततया स्मरणं भवति, न विषयावस्थायाम्। एतदुक्तं भवति। अनुभूतस्य स्मरणं भवति, नानुभूयमानस्य, इतरथा (इतरथा** ] ms.; om. ed.) **धारावाहिक-(धारावाहिक॰** ] ms.; **धारावि॰** ed.)**-ज्ञानानामपि स्मरणत्वप्रसङ्गात्।**

**7 अनुभूतताग्रहणं च** ] But cf. *Nyāyamañjarīgranthibhaṅga* 79.5–7: **अनुभूतताग्रहणं हीति। वस्तुगताऽनुभूतता यदा ज्ञानेन गृह्यते परामृश्यते 'ज्ञातः स' इत्यादिना रूपेण तदा स्मरणम्; अनुभूयमानतया तु ग्रहणम् 'अयम्' इत्यादिना रूपेण।**

**12** *Tātparyaṭīkā* ad *codanā* 47 (51.23–24): **अपि च यदि तावदनुभूततयैव**

---

**5 प्रतिपद्यते** ] $M^{en}VK_1L_1P_1$; **प्रतिपाद्यते** M **6 रजतम्" इति, सत्यरजतप्रतीति॰** ] $MVP_1$; **रजतमिति सत्यरजत॰** $K_1$; **रजतप्रतीति॰** $L_1$(eyeskip)
**8 ॰यमानता॰** ] $MVL_1P_1$; **॰यमानतया** $K_1$

(२) अथानुभवात्मना, तदियं विपरीतख्यातिरेव, स्मृतेरनुभवत्वेन शुक्तेरिव रजतत्वेन प्रतिभासात्।

(३) अथ संविन्मात्रतयैव प्रकाशते, तदपि न युक्तम्, रजतविषयोल्लेखात्, स्मरणानुभवविशेषरहितायाश्च विषयसंवित्तेरनुपपत्तेः।

(४) न चेयमप्रतिपत्तिरेवेति वक्तुमुचितम्, मदमूर्च्छादिदशाविसदृशस्वप्रकाशसंवेदनानुभवात्।

### [2.1.3 विभागासंभवः]

अपि च यथा “इदम्” इत्यंशे स्वप्रकाशसंवेदनम्, तथैव “रजतम्” इत्यत्रापि। द्वयोश्चांशयोः समाने संवेदने। तत्रैकं प्रत्यक्षफलमपरं स्मरणफलमिति कुतस्त्यो विभागः।

### [2.1.4 इदमंशनिरूपणम्]

“इदम्” इत्यत्र च किमवभासत इति निरूप्यम्।

(१) यदि शुक्तिकाशकलं सकलस्वगतविशेषखचितमवभाति, तदा तद्दर्शने सति रजतस्मरणस्य को ऽवसरः। भवदपि वा सादृश्यकृतं स्मरणं न तद् अविवेकाय कल्पते, देवदत्तदर्शनानन्तरोद्गततत्सदृशपुरुषान्तरस्मरणवत्।

---

रजतमवभासितं तदा काविविक्तता।

**1** *Tātparyaṭīkā* ad *codanā* 47 (51.24) अथापरोक्षतया, ततो विपरीतख्यातिः।

---

**2 शुक्तेरिव रजतत्वेन** ] $MK_1P_1$; om. $M^{kha}VL_1$ **4 रजतविषयो°** ] $MVL_1P_1$; रजतमिति विशेषो° $K_1$ **5 °त्तिरेवेति** ] $MVL_1P_1$; °त्तिरेवेतु $K_1$ **5 मद°** ] $MVL_1P_1$; यद° $K_1$ **6 °प्रकाश°** ] $MVL_1P_1$; °प्रकाशन° $K_1$ **8 अपि च यथा** ] $K_1P_1$; यथा $MVL_1$ **8 स्वप्रकाश°** ] $P_1$; स्वप्रकाशं $MVL_1$; स्वप्रकाशन° $K_1$ **9 द्वयो°** ] $K_1P_1$; अपि च द्वयो° $MVL_1$ **9 तत्रैकं** ] $MK_1$; तत एकं $VL_1P_1$ **10 °फलम°** ] $L_1P_1$; °लब्धम° $MV$; °फलमफलम° $K_1$ **10 कुतस्त्यो** ] $MK_1L_1P_1$; कुतस्ते $M^{kha}V$ **12 निरूप्यम्** ] $VK_1L_1^{pc}P_1$; निरूप्यताम् $ML_1^{ac}$ **15 स्मरणं न तद्** ] $MVL_1P_1$; स्मरणन्तद् $K_1$ **15 °दर्शनानन्तरो°** ] $MVK_1L_1P_1^{pc}$; °दर्शनान्तरो° $P_1^{ac}$

(२) अथ धर्मिमात्रम् “इदम्” इति प्रत्यये प्रतिभाति न शुक्तिकाशकलम्, तद् बाढमिष्यते। तदेव चेदं सामान्यधर्मग्रहणवशविरुद्धसंस्कारोपनिबन्धनविरुद्धविशेषस्मरणकारणकम् “इदं रजतम्” इति सामान्योपक्रमं विशेषपर्यवसानं ज्ञानम्, “यदिदं तद् रजतम्” इति सामानाधिकरण्यावमर्शात्।

[2.1.5 प्रवृत्तिः]

रजतानुभवाभिमानेनैव च रजतार्थी तत्र प्रवर्तते।

ननु स्मरणानुभवयोर्विवेकमप्रतिपद्यमानः प्रवर्तत इत्युक्तम्।

श्रुतमिदं यदत्रभवद्भिर् धर्मकीर्तिगृहादाहृतम् “दृश्यविकल्प्यावर्थावेकीकृत्य प्रवर्तते” इति।

किं तु चौर्यमपीदं न कंचन स्वार्थं पुष्णाति। यावद्धि दृश्यं गृहीतमिति न जातः प्रत्ययः, तावत्कथं दृश्यार्थिनस्तत्र प्रवृत्तिः।

---

**1** Cf. section 1.5.2.
**3 विरुद्धविशेष॰** ] *Nyāyamañjarīgranthibhaṅga* 79.8: **विरुद्धविशेषाः शुक्तिरूपापेक्षया ये विरुद्धा रजतत्वादयः।**
**8 इत्युक्तम्** ] See section 1.5.3.
**10** *Pramāṇavārttikasvavṛtti* 39.7–8; *Nyāyamañjarīgranthibhaṅga* 79.9–10: **एकीकृत्य प्रवर्तते इत्यस्यापि ‘तयोर्भेदमगृहीत्वा प्रवर्तते’ इत्येवंरूप एवार्थो यतः।**; cf. *Bṛhatī* I 61.9–62.4 **को ऽयमध्यासो नाम। विवेकाग्रहणम्। स्वरूपमात्रग्रहणाद् भेदाननुसन्धानात् सामान्याध्यासः। अभिन्नस्य चार्थान्तरेण सादृश्यम्। सदृशाननुसन्धानाद् अभेदाध्यासः** (**अभेदाध्यासः** ] em.; **भेदाध्यासः** ed.)**। सदृशानवधारणं तु भेदाननुसन्धानात्।**; *Vibhramaviveka* 65a (=*Brahmasiddhi* 137.17): **दृष्टस्मृताविवेकाच्चेद्**.

---

**2 शुक्तिकाशकलम्** ] VL$_1$P$_1$; **शुक्तिशकलम्** M; **शुक्तिका केवलन्** K$_1$ **2 सामान्य॰** ] MVK$_1$P$_1$; **समान्य॰** L$_1$ **4 ॰पक्रमं** ] K$_1$P$_1$; **॰पक्रमे** MVL$_1$ **7 ॰नेनैव च** ] MVL$_1$P$_1$; **॰नेनैव** K$_1$ **9 श्रुतमिदं यदत्र॰** ] MVL$_1$P$_1$; **श्रुतमिदमत्र॰** K$_1$ **9 ॰दाहृतम्** ] MVL$_1$P$_1$; **॰दागृहं** K$_1$ **9 दृश्यविकल्प्या॰** ] K$_1$L$_1$P$_1$; **दृश्यविकल्पा॰** MV **11 किं तु** ] K$_1$P$_1$; **किं च** MVL$_1$ **11 कंचन** ] K$_1$P$_1$; **कथंचन** MVL$_1$ **12 प्रवृत्तिः** ] MVK$_1$P$_1$; **प्रवृत्ति** L$_1$

एवमिहापि यावद् रजतं गृहीतमिति न प्रत्ययः, तावत्कुतस्तदर्थिनां प्रवृत्तिः। तस्मादस्ति रजतग्रहणम्, न तु तत्स्मरणप्रमोषमात्रम्।

### [2.1.6 रजतस्मरणम्]

ननु रजतस्मरणं विपरीतख्यातिवादिभिरप्यङ्गीकृतमित्युक्तम्।

#### [2.1.6.1 रजतगतविशेषस्मरणम्]

सत्यम्। रजतगतविशेषस्मरणमभ्युपगतम्। यथा हि पुरोवस्थिते धर्मिणि

(१) ऊर्ध्वतादिसाधारणधर्मग्रहणात्
(२) स्थाणुपुरुषगतविशेषाग्रहणाद्
(३) उभयविशेषस्मृतेश्च

संशयो भवति, एवमिहापि

(१) तेजस्वितादिसामान्यधर्मग्रहणाद्
(२) विशेषाग्रहणाद्
(३) रजतगतविशेषस्मृतेश्च

तस्मिन् धर्मिणि रजतप्रत्ययो भवति विपर्ययात्मकः। संशये ह्युभ-

---

**1** Cf. *Vibhramaviveka* 57cd: **नियता न प्रवृत्तिः स्यान्नेष्टा चेत्ख्यातिरन्यथा।**; *Brahmasiddhi* 137.23–138.1: **यदि चक्षुषा संप्रयुक्तं शुक्तिशकलं न "रजतम्" इति प्रतीयात्, रजतं वा तथा, न शुक्तिकाशकल आदित्सया प्रवर्तेत रजतार्थी, तस्य "रजतम्" इत्यनवगतेर्लोष्टादिवत्॥**
**4 °मित्युक्तम्** ] See section 1.4.4.3.
**15** Cf. *Brahmasiddhi* 139.16–17: **अथ मतम्—एकस्मृतौ विपर्ययः, ततो ऽविवेकात्; अनेकस्मृतौ तु संशयः, नैकस्मादविवेकात्।**

---

**1 रजतं** ] $MVK_1^{pc}L_1P_1$; **रजतम°** $K_1^{ac}$ **1 न** ] $K_1P_1$; **न जातः** $MVL_1$ **4 °स्मरणं** ] $MVL_1P_1$; **°स्मरणमपि** $K_1$ **8 °र्ध्वता°** ] $M^{ka}K_1L_1P_1$; **°र्ध्वत्वा°** MV **8 °ग्रहणात्** ] $MVK_1L_1P_1^{pc}$; **°दर्शनात्** $P_1^{ac}$ **10 °स्मृतेश्च** ] $K_1P_1$; **°स्मृतेः** $MVL_1$ **14 रजतगत°** ] $MVL_1P_1$; **रजत°** $K_1$ **15 विपर्यया°** ] $MVK_1P_1$; **विपर्या°** $L_1$ **15 संशये** ] $MVL_1P_1$; **संशयो** $K_1$

यविशेषस्मरणं कारणम्, इह त्वन्यतरविशेषस्मरणमिति विशेषः।

[2.1.6.2 स्मरणाभावसमर्थनम्]

अत एव च—(१) अगृहीतरजतस्येदं ज्ञानं नोत्पद्यते (२) सदृशाग्रहणे वा निशीथादौ—इति।

[2.1.6.3 न स्मरणमात्रम्]

न त्वेतावता स्मरणमात्रमेवेदमितीयति विरम्य स्थातव्यम्, स्मरणजन्यस्य विपर्ययप्रत्ययस्यापि संवेदनात्। अत एव तत्पृष्ठभाविपरामर्शवादिनो वरं सत्यवाचः। ते हि प्रतिभासं न निह्नुवते।

[2.1.7 भ्रमकारणम्]

[2.1.7.1 किं कारणपरीक्षया]

यत्तु विपर्ययावगतेः कारणं विकल्पितम्, तत्रोक्तमेव प्रामाणिकैः—

कार्यं चेदवगम्येत किं कारणपरीक्षया।
कार्यं चेन्नावगम्येत किं कारणपरीक्षया॥

[2.1.7.2 दोषसहितमिन्द्रियं कारणम्]

---

**3** See section 1.3.3.
**8 तत्पृष्ठभाविपरामर्शवादिनो** ] See section 1.5.4.
**11 विकल्पितम्** ] See section 1.3.1.
**12** *Tātparyaṭīkā* ad *codanā* 47 (51.27–52.2): **यत्तु कारणाभावान्नैकं विज्ञानम्, तदनुपपन्नम्** (**तदनुपपन्नम्** ] ed.; om. ms.)। (१) **यदि कार्यमवगम्यते किं कारणविकल्पेन। कथं वा तदाभावः** (**तदाभावः** ] ms.; **तदभावः** ed.)। (२) **अथ नावगम्यते, अनवगमादेव तर्ह्यभावः, न कारणाभावादिति।**

---

**1 विशेषः** ] MV$K_1^{pc}L_1P_1$; **शे विशेषः** $K_1^{ac}$ **4 वा** ] MV$K_1L_1$; **वापि** $P_1$ **6 °तीयति विरम्य स्थातव्यम्** ] V$L_1P_1$; **°तीयति स्थातव्यम्** M; **°ति विरम्य स्थातव्यम्** $K_1$ **8 सत्यवाचः** ] MV$K_1P_1$; **सत्यवचः** $L_1$ **8 ते** ] MV$K_1^{pc}L_1P_1$; **तथा** $K_1^{ac}$ **8 प्रतिभासं** ] MV$L_1P_1$; **प्रतिप्रतिभासनं** $K_1^{ac}$; **प्रतिभासनं** $K_1^{pc}$ **13 चेन्नावगम्येत** ] MV$L_1P_1$; **चेदवगन्तव्यम्येत** $K_1^{ac}$(unmetrical); **चेदवगम्येत** $K_1^{pc}$ **13 °क्षया** ] V$K_1L_1P_1$; **°क्षया॥ इति** M

कार्याकस्मिकतानुपपत्तेश्च कल्प्यतां कारणम्, तच्च कॢप्तमेव दोषसहितमिन्द्रियम्, यथा संस्कारसहकारि प्रत्यभिज्ञायामिति।

[2.1.7.2.1 कल्मषकार्यजननम्]

सुवते शालयो दुष्टा न यद्यपि यवाङ्कुरम्।
शालिकार्यं त्वपूपादि जनयन्त्येव कल्मषम्॥

तस्माद् दोषकलुषितादिन्द्रियात् पुरोवस्थितधर्मिगतत्रिकोणत्वादिविशेषावमर्शकौशलशून्यात् सामान्यधर्मसहचरितपदार्थान्तरगतविशेषस्मरणोपकृताद् भवति विपरीतप्रत्ययः।

[2.1.7.2.2 स्वकार्ये न दुष्टम्]

सम्यग्ज्ञानापेक्षया च तद् दुष्टमुच्यते। स्वकार्ये तु विपर्ययज्ञाने तत् कारणमेव, न दुष्टम्। तस्मात् “रजतम्” इत्यनुभव एव, न प्रमुषिता स्मृतिः।

[2.1.8 बाधकज्ञानसमर्थनम्]

[2.1.8.1 स्वमतसाधनम्]

अपि च “नेदं रजतम्”इति बाधकज्ञानं पूर्वानुभवविषयीकृतरज-

---

**2 दोषसहितमिन्द्रियम्** ] See section 1.3.1.2.

**2** *Tātparyaṭīkā* ad *codanā* 47 (52.2–3): **अपि च दोषसहकारि चक्षुरिन्द्रियं विपर्ययज्ञानोत्पादकम्।**

**10** *Tātparyaṭīkā* ad *codanā* 47 (52.3–4): **सम्यग्ज्ञानाभिप्रायेण दुष्टत्वम्। विपर्ययज्ञाने तु तत्कारणमेव।**

**15** *Tātparyaṭīkā* ad *codanā* 47 (51.19–22): **भवत्पक्षे च “नेदं रजतम्” इति बाधकप्रत्ययोत्पत्तिर्न प्राप्नोति। यदिदमपरोक्षं तद् रजतरूपतया नैव (तद् रज-**

---

**1 कार्या°** ] MVL$_1$P$_1$; **कार्यस्या°** K$_1$ **1 °कस्मिकता°** ] MVL$_1$P$_1$; **°कस्मिकत्वा°** K$_1$ **1 कल्प्यतां** ] MVL$_1$P$_1$; **कल्प्यतान्नाम** K$_1$ **2 °मिन्द्रियम्** ] MVL$_1$P$_1$; **°मिन्द्रिय यथा संस्कारमिन्द्रियं** K$_1$ **6 °कलुषिता°** ] VK$_1$L$_1$P$_1$; **°कलिता°** M **11 न** ] MVL$_1$P$_1$; **न च** K$_1$ **12 प्रमुषिता** ] K$_1$P$_1$; **प्रमुषित°** MVL$_1$

तनिषेधमधिगमयदुत्पद्यते—“रजतमिति यदहमद्राक्षं तद् रजतं न भवति” इति। प्रसक्तस्य चायं प्रतिषेधः। अननुभूतं त्वप्रसक्तमपि प्रतिषिध्यमानं रजतमिव कनकमपि किमिति न निषिध्यते।

[2.1.8.2 परमतदूषणम्]

यत्तु व्याख्यातम् “प्रागनवगतस्मरणानुभवविवेकप्रतिपादकं बाधकज्ञानम्” इति, तद् व्याख्यानमात्रमेव, तथाननुभवात्। न ह्येवं बाधक उत्पद्यते “यदविभक्तं तद्विभक्तम्” इति। अतो यत्किंचिदेतत्। तस्मान्न रजतमिति स्मरणम्। रजते वा कदाचिदनुभवो ऽभूदिति स्मरणमभिधीयमानं नात्यन्तमलौकिकम्।

---

तद्रूपतया नैव ] ms.; तेजस्वितया नैतत् ed.) प्रतिभासितम् (प्रतिभासितम् ] ms.; प्रतिभासितं रजतम् ed.)। यत्त्वनुभूतरजतरूपतया प्रतिभासितमिति मतम् (°सितमिति मतम् ] ms.; °सितमिति मितम् ed.), तद् रजतमेव। अप्रसक्तप्रतिषेधश्चायम्। इतरथा “नायमश्वः” इत्यपि स्यात्।; cf. *Vibhramaviveka* 157: प्रसक्तप्रतिषेधात्मा बोधो ऽख्यातौ न युज्यते। साधयत्यन्यथाख्यातिं बाध एव च नः स्फुटम्॥; *Brahmasiddhi* 143.7–8: प्रसक्तप्रतिषेधात्मा ख्यातिः प्राप्तौ प्रकल्पते॥ नाग्रहः पापको ऽभावः प्रापिका विपरीतधीः।

**5 व्याख्यातम्** ] See section 1.5.5.

**6** *Tātparyaṭīkā* ad *codanā* 47 (51.22–23): शुक्तिकारजतयोर्विवेकग्रहणमिदमिति (°ग्रहणमिदमिति ] ms.; °ग्राहकमिदमिति ed.) चेत्। न, अपरोक्षवस्तुधर्मतया रजताभावमात्रप्रतिभासनात्।

**7** Cf. *Vibhramaviveka* 158–159ab: प्रसञ्जिका हि नाख्यातिर्, अस्मत्पक्षे तु युज्यते। न चाग्रहनिषेधो ऽयं, सर्वज्ञानप्रसङ्गतः॥ विवेकधीर्निषेधो ऽयं न प्रतीत्यानुगम्यते।

---

**1 रजतमिति** ] $K_1P_1$; **नेदं रजतमिति** $MVL_1$ **2 प्रतिषेधः** ] $K_1P_1$; **निषेधः** $MVL_1$ **3 कनकमपि** ] $MVK_1P_1$; **कमपि** $M^{ka}$; **कनकम°** $L_1^{ac}$; **कनक** $L_1^{pc}$ **3 न** ] $MVK_1P_1$; om. $L_1$ **3 निषिध्यते** ] $K_1P_1$; **प्रतिषिध्यते** $MVL_1$ **7 °क उत्पद्यते** ] $K_1L_1P_1$; **°कमुत्पद्यते** M; **°कमुद्भाव्यते** $M^{kha}V$ **7 यदविभक्तं** ] $K_1$; **यदविविक्तं** $MVL_1$; **यदविभिक्तन्** $P_1$ **7 तद्विभक्तम्** ] $K_1P_1$; **तद्विविक्तम्** $MVL_1$ **8 रजतमिति** ] $M^{ka}K_1^{pc}L_1P_1$; **रजत°** MV; **रजतमिवति** $K_1^{ac}$ **9 °मलौकिकम्** ] $MVK_1P_1$; **°मवलोकिकं** $L_1$

### [2.1.9 स्वप्नज्ञानम्]

#### [2.1.9.1 स्वशिरश्छेदादिस्मृतिः]

स्वप्ने तु स्वशिरश्छेदादेरत्यन्ताननुभूतस्य स्मृतिरिति कथ्यमानमेव त्रपाकरम्।

जन्मान्तरे निजमस्तकलवनमनुभूतमनेनेति चेत्।

इदमपि सुभाषिततरं यज्जन्मान्तरानुभूतं स्मर्यते। तत्र च कुतस्त्य एष नियमो यत् कदाचिदेव किंचिदेव स्मर्यते न सर्वदा सर्वमिति।

#### [2.1.9.2 असन्न प्रतिभाति]

ननु भवताप्यसत्ख्यातिं निरस्यता स्वप्नज्ञानेषु तादृक्षु किं वक्तव्यम्।

---

**3** See section 1.5.6.

**4** *Vibhramaviveka* 13: **अत्यन्ताननुभूतानां परस्परपराणुदाम्। दृष्टेश्चावर्तमानस्य न ख्यानं वर्तमानवत्॥**

**6** Cf. *Śābarabhāṣya* ad 1.3.2 (165.3): **जन्मान्तरानुभूतं च न स्मर्यते।**; *Ślokavārttika citrākṣepaparihāra* 20: **"जन्मान्तरानुभूतं च न स्मर्यत" इतीदृशम्। न भाष्यं, न च सूत्रं स्याद् "अप्राप्ते शास्त्रमर्थवत्"॥**; *Vibhramaviveka* 20: **सर्वसंस्कारविच्छेदिमरणान्तरिते [ऽस्मृतेः]। "जन्मान्तरानुभूतं च न स्मर्यत" इति स्थितम्॥**; 143: **"जन्मान्तरानुभूतं च न स्मर्यत" इति स्थितम्। तत् कर्मफलसंबन्धं प्रतीति प्रतिजानते॥**

---

**3 स्मृतिरिति** ] $MVL_1P_1$ ; **स्मृतिरि** $K_1$ **5 °मनुभूतमनेनेति** ] $MVL_1P_1$ ; **°मनेनानुभूतमिति** $K_1$ **6 सु°** ] $MK_1L_1P_1$ ; **स्व°** $M^{kha}V$ **6 °तरं** ] $MK_1L_1P_1$ ; **°मसारम्** $M^{kha}V$ **7 कदाचिदेव किंचिदेव** ] $M^{en}K_1L_1P_1$ ; **कदाचिदेव** MV **7 सर्वदा** ] $MVK_1P_1$ ; **सर्वथा** $L_1$ **9 वक्तव्यम्** ] $VK_1L_1P_1$ ; **वक्तम्** M

यद्वक्तव्यम्, तत् तत्रैव श्रोष्यसि—असन्न प्रतिभातीत्युच्यते, न त्वननुभूतमिति।

नन्वननुभूतं सदिति कथं जानीषे, सदिति चेज्ज्ञातं तदनुभूतमेव। मैवम्। मया तन्नानुभूतम्, अन्येनानुभविष्यते। परानुभूतं च वस्तुवृत्तेन सदिति शक्यते वक्तुम्। परानुभूते तु स्मरणमघटमानमिति नावयोरत्र वस्तुनि समानयोगक्षेमत्वम्।

[2.1.9.3 स्वप्नस्मृतेः केन रूपेण ग्रहणम्]

अपि च भवन्मते स्वप्नस्मृतेः स्मृतित्वेनाग्रहणे केन रूपेण ग्रहणमिति चिन्त्यम्।

(१) रूपान्तरेण ग्रहणे विपरीतख्यातिः।

(२) सर्वात्मना त्वग्रहणे स्वप्नसुषुप्त्योरविशेषप्रसङ्गः।

---

**1 तत्रैव** ] NM II 506.15–16: प्रतिभानिद्रादिमनोदोषजन्मनि स्वप्ने ऽपि दृष्टपूर्वस्यैव तस्याकारस्योल्लेखः।; cf. *Ślokavārttika nirālambana* 107cd–109ab: स्वप्नादिप्रत्यये बाह्यं सर्वथा न हि नेष्यते॥ सर्वत्रालम्बनं बाह्यं देशकालान्यथात्मकम्। जन्मन्येकत्र भिन्ने वा तथा कालान्तरे ऽपि वा॥ तद्देशो वान्यदेशो वा स्वप्नज्ञानस्य गोचरः।

**5 परानुभूते तु स्मरणम°** ] But cf. *Nyāyamañjarīgranthibhaṅga* 79.11–12: परानुभूतेन स्मरणमिति। भवताऽपि स्वप्ने स्वशिरश्छेदानुभवः स्मृतिरूप एवाभ्युपगतस्तत्र च स्वानुभवासम्भवात् परानुभूतस्यैव स्मरणमवश्याभ्युपेयम्।

**8** Cf. section 1.5.6.

**11** *Vibhramaviveka* 9: अख्यातेरविशेषेण स्यात्सुषुप्ते ऽपि विभ्रमः। अख्यातिः खलु तत्रापि, न चाख्यातिर्विशिष्यते॥

---

**1 तत् तत्रैव** ] M$K_1L_1$; **तत्रैव** $M^{kha}VP_1$ **3 नन्वननुभूतं** ] MV$L_1P_1$; **ननु भूतं** $K_1$ **3 सदिति** ] $K_1P_1$; **सत्** MV$L_1$ **3 चेज्ज्ञातं** ] $K_1P_1$; **चेज्ज्ञानं** MV$L_1$ **3 °भूतमेव** ] $K_1P_1$; **°भूतमिति** MV$L_1$ **5 वस्तुवृत्तेन सदिति** ] $K_1P_1^{pc}$; **सदिति** MV$L_1$; **वस्तुवृत्तिना सदिति** $P_1^{ac}$ **5 तु** ] MV$K_1L_1$; om. $P_1$ **6 वस्तुनि** ] MV$K_1P_1$; **अवस्तुनि** $M^{ka}L_1$ **6 °क्षेमत्वम्** ] MV$L_1P_1$; **°क्षेत्वं** $K_1$ **8 स्वप्न°** ] MV$K_1L_1$; **स्वप्ने** $P_1$ **8 °त्वेनाग्रहणे** ] MV$L_1P_1$; **°त्वेन ग्रहण** $K_1$ **11 °सुषुप्त्यो°** ] MV$K_1L_1$; **°सुषुप्तयो°** $P_1$ **11 °प्रसङ्गः** ] MV$L_1P_1$; **°प्रसंगात्** $K_1$

अनुभवप्रत्ययश्च स्वप्ने संवेद्यते, न स्मरणानुल्लेखमात्रमिति दुरभिनिवेश एव स्मृतिप्रमोषसमर्थनं नामेति।

[2.1.10 द्विचन्द्रादिप्रत्ययाः]

द्विचन्द्रादिप्रत्ययेषु कथमख्यातिः।

ननूक्तं तिमिरसीमन्तिता नयनवृत्तिरेकत्वेन ग्रहीतुं न शक्नोति शशाङ्कमिति।

भोः श्रोत्रिय, तादृशी दृशो वृत्तिरेकत्वमिन्दोर्मा ग्रहीत्। द्वित्वानुभवं तु भान्तं क्व प्रच्छादयामः।

ननु चक्षुर्वृत्तौ तद् द्वित्वम्, तद्गतत्वेन तु यत्तस्याग्रहणमयमेव भ्रमः।

नैतदेवम्, नेत्रवृत्तेः सर्वत्र परोक्षत्वात्।

किमेकचन्द्रबोधे ऽपि वृत्त्येकत्वं प्रतीयते।
इयं ह्यगृह्यमाणैव चक्षुर्वृत्तिः प्रकाशिका॥

एवमुच्यमाने चैकचन्द्रग्रहणे ऽपि वृत्त्येकत्वाग्रहणादख्यातिरेव भवेत्।

[2.1.11 तिक्तशर्करादिप्रत्ययाः]

[2.1.11.1 दूषणम्]

---

**4** See section 1.5.7.
**4** Cf. *Vibhramaviveka* 78: **न चाक्षवृत्तितज्जन्मज्ञानभेदाविवेकजाः। द्विचन्द्रादिभ्रमास्, ते हि न प्रत्यक्षे न च स्मृते॥**
**5 ननूक्तं**] See section 1.5.7.1.

---

**1 संवेद्यते**] MVK$_1$P$_1$; **संवेद्येत** L$_1$ **4 °ययेषु च**] K$_1$P$_1$; **°ययेषु** MVL$_1$ **5 तिमिरसीमन्तिता**] MK$_1$L$_1$P$_1$; **सुषिरभिन्ना** M$^{kha}$V **5 ग्रहीतुं**] VK$_1$L$_1$P$_1$; **गृहीतुं** M **8 भान्तं**] ML$_1$P$_1$; **भ्रान्तं** M$^{kha}$VK$_1$; **भवन्तं** M$^{en}$ **9 क्व प्रच्छादयामः। ननु**] MVK$_1$L$_1$; ++++++ P$_1$ **9 तद् द्वित्वम्**] MVL$_1$; **यद्द्वित्वं** K$_1$; +++ P$_1$ **9 तद्गतत्वेन तु**] MVL$_1$; **तद्गतत्वेन** K$_1$; **तद्गतत्वेन**+ P$_1$ **9 यत्तस्याग्रहणमयमेव**] K$_1$; **यत्तस्याग्रहणं स एव** MVL$_1$; +++++++++**मेव** P$_1$ **10 परोक्षत्वात्। किमेकचन्द्रबोधे**] MVK$_1$L$_1$; **परो**+++++++++**धे** P$_1$ **12 ह्यगृह्यमाणैव**] MVK$_1$P$_1$; **गृह्यमाणैव** L$_1$(unmetrical) **13 चैक°**] MVL$_1$P$_1$; **सत्येक°** K$_1$

यदपि तिक्तशर्करादिप्रत्ययेष्वख्यातिसमर्थनकदाशया पित्तवृत्तेस्तिक्तत्वस्य संवेद्यमानस्य तत्स्थत्वेनाग्रहणमुपवर्णितम्, तदपि काशकुशावलम्बनप्रायम्।

मोहात् पित्तगतत्वेन तिक्तता चेन्न गृह्यते।
मा ग्राहि, शर्करायां तु किंकृता तिक्ततामतिः॥

### [2.1.11.2 साधनम्]

सामानाधिकरण्येन हि "तिक्ता शर्करा" इति तदधिकरणतिक्तताप्रतीतिरुपजायते। पित्तं त्विन्द्रियस्थं तिमिरवदगृह्यमाणमपि भ्रममुपजनयति शरीरस्थमिव ज्वरशिरोर्त्यादिरोगमित्यलं प्रसङ्गेन।

## [2.1.12 अख्यातेरनिर्वाहः]

### [2.1.12.1 न परतःप्रामाण्यमपहन्यते]

एवं सर्वत्र नाख्यातिर्निर्वहन्तीव लक्ष्यते।
न चैतयापि परतःप्रामाण्यमपहन्यते॥

---

**2 °मुपवर्णितम्** ] See section 1.5.7.2.

**3 काशकुशावलम्बनप्रायम्** ] Cf. *Tantravārttika* ad 1.3.24 (268.13–14), also quoted at NM II 234.1–2: **अर्थवत्त्वं न चेज्जातं मुख्यैर्यस्य प्रयोजनैः। तस्यानुषङ्गिकेष्वाशा कुशकाशावलम्बिनी॥**; NM II 518.16–17: **तस्मात् प्रमाणतो ऽशक्ये शक्ये वा वस्तुनिर्णये। एवंप्रायमयुक्तं वः कुशकाशावलम्बनम्॥**; *Bhuvaneśalaukikanyāyasāhasrī* 465 (p. 167): **यथा नद्यादौ पतितः सन्नन्यदालम्बनमलभमानो व्याकुलचित्तः कुशकाशादीनालम्बते, तथा वादे दृढासु युक्तिषु निरस्तासु भ्रान्तचित्तः पुमान्निर्बलां युक्तिमवलम्बमानः कृतकृत्यो भवतीति भावः।**; Jacob 1907:19.

---

**1 °कदाशया** ] $MVL_1P_1$; **°तदाशया** $K_1$ **3 काशकुशा°** ] $K_1P_1$; **कुशकाशा°** $MVL_1$ **7 सामानाधिकरण्येन** ··· **°जायते** ] $MK_1L_1P_1$; om. $M^{kha}V$ **7 °करण°** ] $P_1$; **°करणा** $MVL_1$; **°करणे** $K_1$ **8 °गृह्यमाणमपि** ] $MVK_1P_1$; **°गृह्यमानमपि** $L_1$ **9 ज्वर°** ] $K_1P_1$; **ज्वरं** $MVL_1$ **13 °ण्यमप°** ] $M^{kha}VL_1$; **°ण्यमुप°** $MP_1$; **°ण्यं प्रतिहन्यते** $K_1$

रजते ऽनुभवः किं स्यादुत प्रमुषिता स्मृतिः।
द्वैविध्यदर्शनादेवं भवेत्तत्रापि संशयः॥
संशयानश्च संवादं नूनमन्वेषते जनः।
तदपेक्षाकृतं तस्मात्प्रामाण्यं परतो ध्रुवम्॥

### [2.1.12.2 न शून्यवादः प्रतिहन्यते]

न चैष शून्यवादस्य प्रतीकारक्रियाक्रमः।
अनर्थजा हि निर्दग्धपित्रादौ भवति स्मृतिः॥
दृष्टान्तीकृत्य तामेव शून्यवादी समुत्थितः।
भ्रमापह्नवमात्रेण प्रतिहन्तुं न शक्यते॥

### [2.1.12.3 उपसंहारः]

अथास्ति काचित्परतःप्रामाण्यस्य निषेधिका।
शून्यवादस्य वा युक्तिः, सैव वाच्या किमेतया॥
तस्माद् यदर्थमस्याः संश्रयणं तन्न सिद्धमख्यातेः।
संविद्विरोध एव प्रकटित इति धिक् प्रमादित्वम्॥

तदुक्तम्—

कृतश्च शीलविध्वंसो न चानङ्गश्च संगतः।
आत्मा च लाघवं नीतस् तच्च कार्यं न साधितम्॥

---

**2** Cf. section 1.6.
**13 तस्माद् ··· प्रमादित्वम्** ] *Āryā* metre (12,18,12,15). The reading given in the Mysore edition is unmetrical.

---

**1 स्मृतिः** ] $M^{en}VK_1L_1P_1$ ; **मतिः** M **6 न चैष** ] $MVL_1P_1$ ; **न चैवं** $K_1$ **8 तामेव** ] $MVK_1P_1$ ; **तामे˚** $L_1$ **8 ˚वादी** ] $MK_1L_1P_1$ ; **˚वादे** $M^{kha}V$ **9 भ्रमा˚** ] $ML_1P_1$ ; **भ्रमो˚** V **12 वा** ] $K_1P_1$ ; **या** $MVL_1$ **12 वाच्या** ] $MVK_1L_1P_1$ ; **वान्या** $M^{ka}$ **13 यदर्थम˚** ] $P_1$ ; **यथार्थम˚** $MVK_1L_1$ **13 तन्न** ] $MK_1L_1P_1^{pc}$ ; **तच्च˚** $P_1^{ac}$ ; **तत्** $M^{kha}V$ **13 सिद्धम˚** ] $P_1$ ; **निषिद्धम˚** $MVK_1L_1$ **14 संविद्विरोध एव** ] $MVL_1P_1$ ; +++++++ $K_1$ **16 शील˚** ] $MK_1P_1$ ; **शूल˚** $M^{kha}V$ $L_1$ **16 चानङ्गश्च संगतः** ] $MVL_1P_1$ ; **चानंगजमंगतः** $K_1$ **17 साधितम्** ] $VK_1L_1P_1$ ; **साधितम्॥ इति** M

## [2.2 विपरीतख्यातिदूषणपरिहारः]

### [2.2.1 पक्षत्रयम्]

यत्पुनर्विपरीतख्यातौ पक्षत्रयमाशङ्क्य दूषितम्, तदपि न युक्तम्।

#### [2.2.1.1 प्रथमः पक्षः]

अस्तु तावदयमेव पक्षः —"रजतमालम्बनम्, तदेव चास्यां प्रतीतौ परिस्फुरति" इति।

##### [2.2.1.1.1 असत्ख्यातेर्विशेषः]

नन्वत्र चोदितम्—असत्ख्यातिरेव सा भवेदिति।

नैतत्साधु, देशान्तरादौ रजतस्य विद्यमानत्वात्। असत्ख्यातिपक्षे ह्येकान्तासतो ऽर्थस्य प्रतिभानमङ्गीक्रियते, इह तु देशान्तरादौ विद्यमानस्येति महान् भेदः।

##### [2.2.1.1.2 देशान्तरविद्यमानत्वम्]

ननु तत्रासतो ऽर्थस्य किं देशान्तरसत्तया।
किं कुर्मस्, तादृशस्यैव वस्तुनः ख्यातिदर्शनात्॥
यस्तु देशान्तरे ऽप्यर्थो नास्ति कालान्तरे ऽपि वा।
न तस्य ग्रहणं दृष्टं गगनेन्दीवरादिवत्॥

##### [2.2.1.1.3 द्वयोरसतोर्विशेषः]

---

**3 दूषितम्** ] See section 1.4.1.
**6** See section 1.4.1.1.
**8 चोदितम्** ] See section 1.4.1.1.1.
**13** See section 1.4.1.1.2.

---

**3 °परीत°** ] $MVK_1L_1$; **°परीता°** $M^{ka}$; **°पर्यय°** $P_1$ **5 पक्षः** ] $VL_1P_1$; **आद्यः पक्षः** M; ++**पक्षः** $K_1$ **5 चास्यां** ] $MVL_1P_1$; **स्यात्** $K_1$ **9 असत्ख्यातिपक्षे ··· भेदः** ] $MK_1L_1P_1$; **असत्ख्यातिपक्षे हि** $M^{kha}V$ **13 ननु तत्रा°** ] $MK_1L_1P_1$; **तत्रैकान्ता°** $M^{kha}V$ **13 °सत्तया** ] $K_1P_1$; **°चिन्तया** $MVL_1$

अयमेव च द्वयोरसतोर्विशेषो यदेकस्य ग्रहणं दृष्टम्, इतरस्य न दृष्टमिति।

[2.2.1.1.4 असदर्थप्रतिभासोपपादनम्]

ननूक्तम्—तत्रासतो ऽर्थस्य कथं ज्ञानजनकत्वम्, अजनकस्य वा कथं प्रतिभासः।

उक्तमत्र—सदृशपदार्थदर्शनोद्भूतस्मृत्युपस्थापितस्य रजतस्यात्र प्रतिभासनमिति। न चास्योपस्थापनं पशोरिव रज्ज्वा संयम्य ढौकनम्, अपि तु हृदये परिस्फुरतो ऽर्थस्य बहिरवभासनम्। न चैतावतेयमात्मख्यातिरसत्ख्यातिर्वेति वक्तव्यम्, (१) विज्ञानाद्विच्छेदप्रतीतेर् (२) अत्यन्तासदर्थप्रतिभासाभावाच्चेति।

[2.2.1.2 द्वितीयः पक्षः]

[2.2.1.2.1 प्रतिज्ञा]

अथ वा "पिहितस्वाकारा परिगृहीतपराकारा शुक्तिकैवात्र प्रतिभाति" इति भवतु पक्षः।

[2.2.1.2.2 विवरणम्]

---

**4 ननूक्तम्** ] See section 1.4.4.3.
**6 उक्तम॰** ] See section 2.1.6.
**7** See section 1.4.1.1.4.
**10** Cf. sections 1.4.3.2.1 and 1.4.4.1.
**10** Cf. section 1.4.2.4.
**14** See section 1.4.1.2.

---

**1 ॰सतोर्विशेषो** ] $K_1P_1$ ; **॰सत्त्वयोर्विशेषः** $MVL_1$ **1 यदेकस्य** ] $MVL_1P_1$ ; **यमेकस्य** $K_1$ **1 ॰म्, इतरस्य** ] $MVK_1L_1$ ; **॰मपरस्य** $P_1$ **4 तत्रासतो ऽर्थस्य कथं** ] $MVK_1L_1$ ; **कथं तत्रासतो र्थस्य** $P_1$ **7 प्रतिभासनमिति** ] $MVL_1P_1$ ; **प्रतिभानमिति** $K_1$ **7 ॰स्थापनं** ] $MK_1L_1P_1$ ; **॰स्थानं** V **7 संयम्य** ] $MVK_1P_1$ ; **संशयम्य** $L_1^{ac}$ ; **संशम्य** $L_1^{pc}$ **9 ॰यमात्मख्यातिरसत्ख्यातिरेवेति** ] $MVK_1P_1$ ; **॰यमसत्ख्यातिरात्मख्यातिर्वेति** $L_1$ **13 अथ वा** ] $MK_1L_1P_1$ ; **अत एव** $M^{kha}V$ **13 शुक्तिकैवात्र** ] $MVK_1L_1$ ; **शुक्तिकैव** $P_1$ **14 भवतु** ] $MVL_1P_1$ ; **वा भवतु** $K_1$ **14 पक्षः** ] $VK_1L_1P_1$ ; **द्वितीयः पक्षः** M

ननूक्तम्—कृत्या सीतावत् किमिदं वेशभाषाभरणपरिवर्तनम्, कथं च रजतज्ञाने शुक्तिकावभासितुमर्हति।

श्रुतमिदं नाटकम्, न तु वयमत्रोपहासपात्रम्।

(१) "शुक्तिका" इति वस्तुस्थितिरेषा कथ्यते।

(२) पुरोवस्थितं धर्मिमात्रं भास्वररूपादिसादृश्योपजनितरजतविशेषस्मरणम् "अत्र प्रतिभाति" इति ब्रूमः, "यदेतत्पुरः किमपि वर्तते, तद् रजतम्" इत्यनुभवात्। वस्तुस्थित्या तु शुक्तिरेव सा।

(३) त्रिकोणत्वादिविशेषग्रहणाभावाच्च सा "निगूहितनिजाकारा" इत्युच्यते।

(४) रजतविशेषस्मरणाच्च "परिगृहीतपराकारा" इति।

### [2.2.1.2.3 दृष्टान्तविभागः]

एतच्च विषयेन्द्रियदोषप्रभवेषु

(१-१) शुक्तिकारजतावभास-

(१-२) भास्करकिरणजलावगम-

(१-३) जलदगन्धर्वनगरनिर्वर्णन-

(१-४) रज्जुभुजगग्रहण-

---

**1 ननूक्तम्** ] See section 1.4.1.2.

**14** Cf. *Ślokavārttika nirālambana* 110cd–111ab: **पूर्वानुभूततोयं च रश्मितप्तोषरं तथा॥ मृगतोयस्य विज्ञाने कारणत्वेन कल्प्यते।**

---

**1 °भरणपरिवर्त्तनं** ] $K_1P_1^{pc}$; **°परिवर्तनम्** $MVP_1^{ac}$; **°परिगृहीतपरिकारा शुक्तिकैवा प्रतिभातीति भवतु पक्ष वर्तनम्** $L_1^{ac}$; **°परिगृहीतपरिवर्तनम्** $L_1^{pc}$ **2 °र्हति** ] $VK_1L_1$; **°र्हतीति** $MP_1$ **3 °त्रोपहास°** ] $MK_1L_1P_1$; **°त्रापहास°** V **4 कथ्यते** ] $MVL_1P_1$; **वस्तु कथ्यते** $K_1$ **5 °वस्थितं** ] $MVL_1P_1$; **°वस्थित°** $K_1$ **6 यदेतत्पुरः** ] $MVK_1P_1$; **यदेतरः** $L_1^{ac}$; **यदेतपुरः** $L_1^{pc}$ **8 °भावाच्च सा** ] $K_1P_1$; **°भावाच्च** $MVL_1$ **8 निगूहित°** ] $MVK_1L_1P_1^{pc}$; **निगूहि°** $P_1^{ac}$ **10 रजत°** ] $MVL_1P_1$; **रज°** $K_1$ **10 परिगृहीतपराकारा" इति** ] $K_1$; **परिगृहीतरजताकारेति** $MVL_1P_1$ **12 °येन्द्रिय°** ] $K_1P_1$; **°येन्द्रियादि°** MV; **°येन्द्रिये** $L_1$ **12 °प्रभवेषु** ] $MVK_1L_1P_1$; **°भवेषु** $M^{ka}$ **15 °नगर°** ] $MVK_1P_1$; **°नागर°** $L_1$

(२-१) रोहिणीरमणद्वयदर्शन-

(२-२) शङ्खशर्करापीततिक्तताव्साय-

(२-३) केशकूर्चकालोकनादि-

विभ्रमेष्वभ्युपगम्यते।

(३) मनोदोषनिबन्धनेषु तु मिथ्याप्रत्ययेषु निरालम्बनेषु स्मृत्युल्लिखित एवाकारः प्रकाशत इति।

[2.2.1.3 तृतीयः पक्षः]

[2.2.1.3.1 आलम्बनत्वम्]

यस्तु तृतीयः पक्षः "अन्यदालम्बनम्, अन्यच्च प्रतिभाति" इति कैश्चिदाश्रितः, तत्रापि न संनिहितस्यालम्बनत्वमुच्यते येन भूप्रदेशस्यापि तथात्वमाशङ्क्येत। नापि जनकस्यालम्बनत्वं यच्चक्षुरादावपि प्रसज्येत। किं तु "इदम्" इत्यङ्गुल्या निर्दिश्यमानं कर्मतया यज्ज्ञानस्य जनकं तदालम्बनमित्युच्यमाने न कश्चिद्दोषः।

[2.2.1.3.2 केशोण्डुकज्ञानालम्बनम्]

ननु केशोण्डुकज्ञाने किमालम्बनकारणम्।

---

**2** Cf. *Vibhramaviveka* 76 (=*Brahmasiddhi* 140.5–6): न च सर्वा नियोगेन भ्रान्तिः सादृश्यबन्धना। श्वेते पीतभ्रमो दृष्टो मधुरे तिक्तविभ्रमः॥

**5 मनोदोषनिबन्धनेषु** ] *Nyāyamañjarīgranthibhaṅga* 79.13: मनोदोषनिबन्धनेषु मानसनिद्रादिदोषजेषु स्वप्नादिज्ञानेषु।

**9** See section 1.4.1.3.

**11** *Vibhramaviveka* 40: आलम्बनं न हेतुत्वमात्रादक्षे ऽपि तद्गतः। आलम्बनं न हेतुत्वमात्रेण व्यवतिष्ठते॥; *Brahmasiddhi* 136.23: ज्ञानहेतुमात्रस्यानालम्बनत्वाच्चक्षुरादिवत्।

---

**5 तु** ] $MVL_1P_1$ ; om. $K_1$ **6 एवाकारः** ] $MK_1L_1P_1$ ; निराकारः $M^{kha}V$ **10 संनिहितस्या॰** ] $MVL_1P_1$ ; सन्निहिता॰ $K_1$ **11 जनकस्यालम्बनत्वं** ] $MK_1L_1P_1$ ; आलम्बनस्याजनकत्वं $M^{kha}V$ **12 ॰त्यङ्गुल्या** ] $MVL_1P_1$ ; ॰त्यंगुल्यादिना $K_1$ **15 केशोण्डुक॰** ] $K_1L_1P_1$ ; केशोण्ड्रक॰ MV

नायना रश्मयः सूक्ष्माः सूर्यांशुशबलीकृताः।

(१) किंचिद्धितिमिरं रोमराजिरिव नयनधाम्नो मध्य एवास्ते। तेन द्विधाकृता नयनवृत्तिर्द्वित्वेन चन्द्रमसं गृह्णाति।

(२) किंचित्तु तिमिरं तितउविवरवदन्तरान्तरा तिष्ठति चक्षुषः। तेन विरलप्रसृता नयनरश्मयः सूक्ष्माः सूर्यांशुभिरभिहन्यमानाः केशकूर्चकाकारा भवन्तीति त एवालम्बनम्, अनुदिते ऽस्तमिते वा सवितरि केशोण्डुकप्रत्ययस्यानुत्पादात्।

[2.2.1.3.3 गन्धर्वनगरज्ञानालम्बनम्]

गन्धर्वनगरज्ञाने जलदाः पाण्डुरत्विषः।
आलम्बनं गृहाट्टालप्राकाराकारधारिणः॥

[2.2.1.4 उपसंहारः]

तस्माद् विपरीतख्यातौ पक्षत्रयमपि निरवद्यम्।

---

**4 तिमिरं तितउविवरवद°** ] *Nyāyamañjarīgranthibhaṅga* 79.14: **तिमिरं तितउविवरवदिति। तितउ परिपवनम्।**; *Nirukta* 4.9 (quoted in N. Shah's note): **तितउ परिपवनं भवति ततवद्वा तुन्नवद्वा तिलमात्रतुन्नमिति वा।**; *Durgavyākhyā* (N. Shah's note): **सक्तवः परिपूयन्ते येन द्रव्येण तत् परिपवनमुच्यते। ततेन चर्मणा नद्धं 'तितउ'। तुन्नैर्वा छिद्रैः तद्वत् तितउ। तिलमात्राणि वा तुन्नानि तस्मिन्निति तितउ।**

---

**1 °कारणम्। नायना रश्मयः सूक्ष्माः सूर्यांशुशबलीकृताः** ] $P_1$; **°कारणम्** $MVL_1$; **°कारकं नायना रश्मयस्सूक्ष्मास्सूर्यांशुशबळीकृताः** $K_1$ **2 किंचिद्धि°** ] $K_1P_1$; **किंचित्तु** $MVL_1$ **2 मध्य एवास्ते** ] $MVL_1P_1$; **मध्यमध्यास्ते** $K_1$ **4 तितउ°** ] $K_1P_1$; **तत्र** $MVL_1$ **4 चक्षुषः** ] $MVK_1P_1$; **चक्षुः** $L_1$ **5 विरल°** ] $MVL_1P_1$; **विरळ°** $K_1$ **5 नयनरश्मयः** ] $MVK_1^{pc}L_1P_1$; **नयतरश्मयश्मयः** $K_1^{ac}$ **5 °भिरभिहन्यमानाः** ] $K_1P_1$; **°भिरुपहन्यमानाः** MV; **°भिरभिहन्यमानः** $L_1$ **6 त एवा°** ] $P_1$; **तदेवा°** $MVL_1$; **क एवा°** $K_1$ **6 ऽस्तमिते** ] $MVP_1$; **अमिते** $L_1$ **7 केशोण्डुक°** ] $K_1L_1P_1$; **केशोण्ड्रक°** MV **10 °प्राकारा°** ] $K_1L_1P_1$; **°प्रकारा°** MV **12 विपरीत°** ] $MVK_1L_1P_1$; **विपरीता°** $M^{ka}$

### [2.2.2 इतरेतरसङ्करपरिहारः]

यत् पुनरितरेतरसङ्करः ख्यातीनामुदाहारि, तत्रात्मख्यात्यसत्ख्याती अपवर्गाह्निके वयमपि विज्ञानाद्वैतमपाकरिष्यन्तः पराकरिष्याम इति किं तच्चिन्तया। विपरीतख्यातौ तु तत्साङ्कर्यं परिहृतम्।

### [2.2.3 स्मृतिप्रमोषः]

यत्पुनरवादि—“सर्ववादिभिः स्मृतिप्रमोषो ऽभ्युपगत एव, प्राभाकरैस्तु यशः पीतम्” इति, तत्र वाद्यन्तराणि तावद् यथा भवन्ति तथा भवन्तु। वयं तु स्मृत्युपारूढरजताद्याकारप्रतिभासमभिवदन्तो बाढं स्मृतिप्रमोषमभ्युपगतवन्तः। किं तु न तावत्येव विश्राम्यति मतिः। अपि तु रजताद्यनुभवो ऽपि संवेद्यत इति न स्मृतिप्रमोषमात्र एव विरन्तव्यम्। अतो विपरीतख्यातिपक्ष एव निरवद्य इति स्थितम्।

### [2.2.4 बाधप्रकारः]

यस्तु बाधप्रकारः प्राग् विकल्पितः, तत्र सहानवस्थानसंस्कारोच्छेदादिपक्षा अनभ्युपगमेनैव निरस्ता इत्यस्थाने कण्ठशोष आयुष्मतानुभूतः।

---

**2 °मुदाहारि** ] For *viparītakhyāti* at 1.4.1.1, *asatkhyāti* at 1.4.2.5, and *ātmakhyāti* at 1.4.3.2.
**4** See section 2.2.1.1.1.
**6 °रवादि** ] See section 1.4.4.4.
**14 विकल्पितः** ] See section 1.2.1.
**14 सहानवस्थान°** ] See section 1.2.1.2.
**15 संस्कारोच्छेदा°** ] See section 1.2.1.3.

---

**2 यत्** ] $K_1P_1$ ; **यः** MV$L_1$ **3 °ख्यात्यसत्ख्याती** ] $K_1L_1P_1$ ; **°ख्यात्यख्याती** MV **3 वयमपि** ] MV$L_1P_1$ ; **स्वयमपि** $K_1$ **3 विज्ञानाद्वैतम°** ] MV$K_1L_1^{pc}P_1$ ; **विरवश्यम् ज्ञानावद्वैतम°** $L_1^{ac}$ **3 °करिष्यन्तः परा°** ] MV$L_1P_1$ ; **°करिष्यन्तो वा** $K_1$ **6 ऽभ्युपगत** ] MV$K_1P_1$ ; **भ्युपगमत** $L_1$ **14 बाध°** ] MV$L_1P_1$ ; **बाधक°** $K_1$

### [2.2.4.1 **विषयापहारः**]

विषयापहारस्तावदस्तु बाधः। विषयस्य च न प्रतिभातत्वमपह्रियते, किं तु प्रतिभातस्यासत्त्वं ख्याप्यत इत्यपहारार्थः।

### [2.2.4.1.1 **विषयाभावग्रहः कालान्तरभावी**]

असत्त्वमपि नेदानीमुपनतस्य ख्याप्यते येन पूर्वदृष्टद्रूघणभग्नकुम्भाभावप्रतिभासवदबाधः स्यात्।

### [2.2.4.1.2 **विषयाभावग्रहस्तात्कालिकः**]

न च तदानीमप्यभावग्रहणे वस्तुनो द्व्यात्मकत्वमाशङ्कनीयम्, पूर्वावगताकारोपमर्दद्वारेण बाधकप्रत्ययोत्पादात्—“यन् मया तदा रजतमिति गृहीतम्, तद् रजतं न भवति, अन्यदेव तद्वस्तु” इति।

### [2.2.4.1.3 **तदानींतनासत्त्वप्रत्ययः**]

ननु स्वकालनियतत्वाज्ज्ञानानां कथमुत्तरस्य ज्ञानस्य पूर्वज्ञानोत्पादकालावच्छिन्नतद्विषयाभावग्रहणसामर्थ्यम्।

किं कुर्मः, तथा प्रत्ययोत्पादात्। न भग्नघटवदिदानीं तन्नास्तिता गृह्यते। अपि तु “तदैव तदसत्” इति प्रतीतिः। यथा च न वर्त-

---

**2 विषयापहार॰** See section 1.2.1.4.

**3 ॰आसत्त्वं ख्याप्यत** ] See section 1.2.1.5.

**5** See section 1.2.1.5.1: **कालान्तरभावितदभावग्रहणस्य बाधकत्वे** ···

**8** See section 1.2.1.5.2: **तदैव तु तदभावग्रहणे** ···

---

**3 प्रतिभात॰** ] $MVK_1P_1$ ; **प्रतिभास॰** $L_1$ **5 ॰पनतस्य** ] $MVK_1L_1$ ; **॰पनतमस्य** $P_1$ **5 पूर्वदृष्ट॰** ] $MK_1L_1P_1^{pc}$ ; **दृष्टपूर्व॰** $M^{kha}V$ ; **पूर्व॰** $P_1^{ac}$ **5 ॰द्रूघण॰** ] $MK_1P_1$ ; **॰द्रुघण॰** V ; **॰द्रूघन॰** $L_1$ **6 ॰कुम्भाभाव॰** ] $MVK_1P_1$ ; **॰कुम्भाकार॰** $L_1$ **9 तदा** ] $MVK_1P_1$ ; om. $L_1$ **13 ननु** ] $MVL_1P_1$ ; om. $K_1$

मानैकनिष्ठा एव विषयप्रतीतयः, तथा क्षणभङ्गभङ्गे वक्ष्यामः।

[2.2.4.2 फलापहारः]

अथ वा फलापहारो भवतु बाधः। प्रमाणफलत्वं च हानादिबुद्धीनां प्रत्यक्षलक्षणे वर्णितमिति तदपहरणात्प्रमाणं बाधितं भवत्येव। किं कुर्वता बाधकेन प्रमाणेन फलमपहृतमिति चेत्।

गायता नृत्यता वापि जपता जुह्वतापि वा।
तच्चेत्कार्यं कृतं तेन किमवान्तरकर्मणा॥
तदभ्युपगमे वापि तत्किं विदधता कृतम्।
तच्च किं कुर्वतेत्येवमवधिः को भविष्यति॥

तदलममुनावान्तरव्यापारप्रश्नेन। सर्वथा बाधकप्रत्ययोपजनने सति हानादिरूपं पूर्वप्रमाणफलं निवर्तत इति तेन तद्बाधितमुच्यते।

[2.2.4.3 समानासमानविषयविकल्पः]

---

**1 क्षणभङ्गभङ्गे** ] NM II 331.12–16: **ननु भूतकालस्येदानीमभावात् तद्विषयं ज्ञानमनर्थजं स्यात्। न, धर्मिणस्तदवच्छिन्नस्य ज्ञानजनकस्य भावात्। भूतः कथमवच्छेदक इति चेत्। तथा प्रतिभासात्। प्रतीतिमवमृशतु भवान्। "स एवायम्" इति "यः पूर्वमासीत्, स इदानीमप्यस्ति" इति। सो ऽयमतीतकालविशिष्टो ऽर्थ एतस्यां बुद्धाववभासते।**
**3 फलापहारो** ] See section 1.2.1.7.
**4 प्रत्यक्षलक्षणे** ] NM I 174.6–7: **प्रमाणतायां सामग्र्यास्तज्ज्ञानं फलमिष्यते। तस्य प्रमाणभावे तु फलं हानादिबुद्धयः॥**; NM I 189.7–8: **तस्मात् सुष्ठूक्तम्—यदा ज्ञानं प्रमाणं तदा हानादिबुद्धयः फलम्—इति।**

---

**1 न वर्तमानैक॰** ] $MVP_1$; ++++**नैक॰** $K_1$; **वर्तमानैक॰** $L_1$   **1 ॰यप्रतीतयः** ] $MVK_1L_1^{pc}$; **॰यप्रतीतियस्** $L_1^{ac}$; ++++**य** $P_1$   **4 प्रत्यक्ष॰** ] $MVK_1P_1$; **प्रत्यय॰** $L_1$   **5 ॰धकेन प्रमाणेन फलमपहृ॰** ] $P_1$; **॰धकेन प्रमाणफलमपहृ॰** $MVL_1$; ++++++++++++ $K_1$   **9 को भविष्यति** ] $MVL_1P_1$; +++**ष्यति** $K_1$   **10 ॰वान्तरव्यापार॰** ] $K_1P_1$; **॰वान्तर॰** $MVL_1$   **10 ॰प्रश्नेन। सर्वथा** ] $ML_1P_1$; **॰प्रश्नेन सर्वत्र** $M^{kha}V$; +++++**था** $K_1$   **11 निवर्तत** ] $MVK_1P_1$; **निवर्तयत** $M^{ka}L_1$

समानासमानविषयविकल्पो ऽपि न पेशलः, एकस्मिन् विषये विरुद्धाकारग्राहिणोर्ज्ञानयोर्बाध्यबाधकभावाभ्युपगमात्।
चित्रादिप्रत्यये कथं न बाध इति चेत्।
पूर्वज्ञानोपमर्देनोत्तरज्ञानानुत्पादात्।

[2.2.4.4 विरुद्धधर्मसमावेशः]

अत एवैकत्रापि धर्मिणि बहूनामनितरेतरोपमर्देन वेद्यमानानामस्त्येव धर्माणां समावेशः।

[2.2.4.5 उत्तरज्ञानमेव बाधकम्]

पूर्वोपमर्देनोत्तरविज्ञानजन्मतश्चैतदपि प्रत्युक्तं भवति, यदुक्तं पूर्वस्मिन्प्रत्यये प्राप्तप्रतिष्ठे सत्यागन्तु ज्ञानमुत्तरं बाध्यतामिति। यतः पूर्वानुपमर्देन नैव तदुत्तरं ज्ञानमुदेति, विषयसहायत्वात्। प्रमाणान्तरानुगृह्यमाणत्वाच्चोत्तरमेव ज्ञानं बाधकमिति युक्तम्।

[2.2.4.6 उपसंहारः]

तस्मादस्ति ज्ञानानां बाध्यबाधकभावः। स चायं बाधव्यवहारो विपरीतख्यातिपक्ष एव सामर्थ्यमस्खलितं ददातीति स एव ज्यायान्।

[3 मीमांसकैकदेशिमतनिरासः]

---

**1 समानासमानविषयविकल्पो** ] See section 1.2.2.
**9 यदुक्तं** ] See section 1.2.3.

---

**2 °ग्राहिणो°** ] MVK$_1$P$_1$; **°ग्राहिनो°** L$_1$ **4 °रज्ञाना°** ] P$_1$; **°रविज्ञाना°** MVK$_1$L$_1$ **6 बहूनामनितरेतरोपमर्देन** ] em.; **बहूनां धर्माणामितरेतरानुपमर्देन** MVL$_1$; **बहूनामनितरेतरावमर्देन** K$_1$; **बहूनामनितरेतरोपर्देन** P$_1$ **7 °नामस्त्येव धर्माणां** ] K$_1$P$_1$; **°नामस्त्येव** MV; **°नास्त्येव** L$_1$ **9 °नोत्तर°** ] MK$_1$L$_1$P$_1$; **°नेतर°** M$^{kha}$V **9 °विज्ञानजन्मतश्चैतदपि** ] MK$_1$L$_1$P$_1$; **°विज्ञानाजननाच्चैतदपि** M$^{kha}$V **9 यदुक्तं** ] MVL$_1$P$_1$; **तदुक्तं** K$_1$ **10 °गन्तु** ] MVL$_1$P$_1$; **°गन्तुकं** K$_1$ **11 पूर्वानुपमर्देन नैव** ] P$_1$; **पूर्वोपमर्देनैव** MVL$_1$; **पूर्वानुपमर्देन नै°** K$_1$ **14 बाधव्यवहारो** ] MVL$_1$P$_1$; **बाध्यव्यवहारो** K$_1$ **15 ददातीति** ] K$_1$P$_1$; **दधातीति** MV; **तदातीति** L$_1$

## [3.1 तन्मतोपन्यासः]

†अज्ञोको नाम† मीमांसकस्त्वाह। येयं शुक्तिकायां रजतप्रतीतिर्विपरीतख्यातिरिति तद्वादिनामभिमता सा तथा न भवति, सत्यरजतप्रतीतिवदत्राप्यवभास्यरजतसद्भावात्। लौकिकालौकिकत्वे तु विशेषः। रजतज्ञानावभास्यं हि रजतमुच्यते। तच्च किंचिद्व्यवहारप्रवर्तकं किंचिन्नेति। तत्र व्यवहारप्रवर्तकं लौकिकमुच्यते, ततो ऽन्यदलौकिकमिति। यच्च शुक्तिशकलमिति भवन्तो वदन्ति, तदलौकिकं रजतम्। रजतज्ञानावभास्यत्वाद् रजतं तत्, व्यवहाराप्रवृत्तेरलौकिकमिति।

## [3.2 तन्निराकरणम्]

### [3.2.1 न बाधकेन रजतस्यालौकिकत्वं ख्याप्यते]

तदेतद् अपरामृष्टसंवेदनेतिवृत्तस्याभिनवपदार्थसर्गप्रजापतेरभिधान-

---

**2** *Tātparyaṭīkā* ad *codanā* 47 (52.6–10): **संवित्परामर्शकुशलस्त्वाह—सत्यमेकमेवेदं विज्ञानम्। अपरोक्षतया चात्र रजतमेवावभासते। तथापि नैवेदं विपर्ययविज्ञानम्** (**विपर्ययविज्ञानम्**] ms.; **विज्ञानमप्रमाणम्** ed.), **प्रतिभासाविशेषात्, इतररजतविज्ञानवदत्राप्यपरोक्षरजतसद्भावात्। लौकिकालौकिकत्वे तु विशेषः। प्रतिभासाविशेषे ऽपि रजतव्यवहारप्रवर्तकं** (**रजतव्यवहारप्रवर्तकं**] ms.; **व्यवहारप्रवर्तकं** ed.) **हि लोके संमतं रजतम्। यत्तु रजतव्यवहारं न प्रवर्तयति, अथ च रजतज्ञानसंवेद्यम्, तदलौकिकं रजतमिति।**

**12** *Tātparyaṭīkā* ad *codanā* 47 (52.10–15): **तदनुपपन्नम्। इह हि क्वचित् "रजतमिदम्" इति सर्वेषां सर्वदा प्रतिभासोत्पत्तिः, क्वचिच्च "रजतमिदम्, नेदं रजतम्" इति विधिप्रतिषेधरूपप्रतिभासद्वयोत्पत्तिः। तत्र प्रतिभासविशेषात्** (**प्रतिभासविशेषात्**] ms.; **प्रतिभासाविशेषात्** ed.) **किंचिद् रतजमेव। अपरं तु**

---

**2 अज्ञोको**] $K_1P_1$; **अज्ञः को ऽपि** MV; **अज्ञः को** $L_1$ **3 भवति**] $K_1L_1P_1$; **भवतीति** MV **4 °प्यवभास्य°**] $MVK_1L_1$; **°प्यवभासस्य** $P_1$ **6 °प्रवर्तकं**] $MVK_1L_1P_1^{pc}$; **°प्रर्वकं** $P_1^{ac}$ **6 तत्र**] $MVK_1L_1P_1^{pc}$; **तच्च** $P_1^{ac}$ **6 ततो**] MV $L_1P_1$; **तत्रो** $K_1$ **7 शुक्ति°**] $K_1L_1$; **शुक्तिका°** $MVP_1$ **7 वदन्ति**] $MVK_1L_1$; **विदन्ति** $P_1$ **12 °संवेदनेति°**] $MVP_1$; **°संवेदनेतिप्र°** $K_1$; **°संवेदेनेति°** $L_1$

म्, बाधकप्रत्ययेन तत्र रजताभावस्य ख्याप्यमानत्वात्। “नेदं रजतम्” इति हि रजतं प्रतिषेधत्येष प्रत्ययः, न विद्यमानस्य रजतस्यालौकिकत्वमवद्योतयतीति।

### [3.2.2 रजताभावः ख्याप्यते]

अथ “नेदं रजतं लौकिकम्” इति व्याख्यायते, हन्त, वाक्यशेषः क्रियताम् “सं यजत्रैरङ्गानि” इतिवत्। सो ऽयं श्रोत्रियः स्वशास्त्रवर्तनीमिहापि न त्यजति। न तु तस्या अयमवसरः। अगृह्यमाणे

---

सदसदात्मकं युगपत्क्रमेण वा भवतु बाध्यबाधकपर्यालोचनेन वा विपरीतख्यातिरिति केयमलौकिकता लौकिकता वा संवित्परामर्शशून्या (॰मर्शशून्या ] ms.; ॰मर्शस्य ed.)।

**5** *Tātparyaṭīkā* ad *codanā* 47 (52.20–24): ननु “नेदं रजतम्” इति “नेदं लौकिकम्” इति गुणपरं व्याख्यायते। तदिदं प्रतिभासशून्यं संवित्परामर्शवादी कथं ब्रूयात्। कथं “नेदं रजतम्” इत्यत्रापरोक्षतया प्रतिभासमाने रजताभावे “नेदं लौकिकम्” इति तद्धर्मतया लौकिकत्वाभावो ऽवसीयते। न ह्यप्रतिभासमाने धर्मिणि तद्धर्मतया रूपरसादयो ऽवभासन्ते।

**6** सं यजत्रैरङ्गानि ] *Nyāyamañjarīgranthibhaṅga* 79.15–20: संयजत्रैरङ्गानि इति। “सं ते वायुर्वातेन गच्छतां सं यजत्रैरङ्गानि समाशिषा यज्ञपतिः” [मै॰ सं॰ १-२-१५]। वायुस्ते तव सम्बन्धी वातेन सङ्गच्छतां सम्बन्ध्यताम्, अङ्गानि यजत्रैर्देवैः सङ्गच्छताम्, यज्ञपतिर्यजमान आसि(शि)षा सङ्गच्छतामिति पशुविशसनमन्त्रस्यार्थः। अत्र प्रकृतस्य ‘गच्छताम्’ इत्यस्यैकवचनत्वात् ‘यजत्रैरङ्गानि’ इत्यत्र ‘गच्छन्ताम्’ इति लौकिको वाक्यशेषः कार्यः संशब्दस्तु श्रूयमाणः स्थित एव।

---

**1** रजताभावस्य ] $MVK_1L_1$; रताभाव++ $P_1^{ac}$; रजताभाव++ $P_1^{pc}$ **1** ख्याप्यमानत्वात् ] $K_1$; ख्यापनात् $MVL_1$; ख्याप्राप्यमानत्वात् $P_1$ **2** हि ] $MVK_1L_1P_1^{pc}$; om. $P_1^{ac}$ **2** प्रतिषेधत्येष ] $MVK_1P_1$; प्रतिषेधयत्येष $L_1$ **2** विद्यमानस्य ] $K_1L_1P_1$; विद्यमान॰ MV **3** ॰द्योतयतीति ] $MK_1$; ॰द्योतयते इति $VL_1$; ॰द्योतयति $P_1$ **5** नेदं रजतं ] $K_1L_1P_1$; नेदं MV **6** श्रोत्रियः स्व॰ ] $MVL_1P_1^{pc}$; श्रोत्रियस्य $K_1$; श्रोत्रियः $P_1^{ac}$ **7** ॰वर्तनीमिहापि ] $MVL_1P_1$; ॰वर्त्तनीहिमापि $K_1$ **7** न ] $M^{ka}K_1L_1P_1$; न तां MV **7** तस्या अयम॰ ] $VK_1L_1P_1$; तस्यायम॰ M

तु रजताख्ये धर्मिणि कथं तद्धर्मत्वेनालौकिकत्वं गृह्येत।

रजताभावग्रहणे त्वेष न दोषः, भावतदभावयोर्धर्मधर्मिभावाभावात्। स्मर्यमाणप्रतियोग्यवच्छिन्नो ह्यभावो गृह्यत एव। तस्मादत्र नास्त्येव रजतम्, न पुनरलौकिकं तदस्ति।

### [3.2.3 रजतलक्षणम्]

न च रजतज्ञानावभास्यत्वमात्रं रजतलक्षणम्, अपि त्वबाधितरजतज्ञानगम्यत्वम्।

### [3.2.4 लौकिकालौकिकप्रविभागः]

अपि च लौकिकालौकिकप्रविभागः प्रतिभासनिबन्धनो वा स्यात्, व्यवहारसदसद्भावनिबन्धनो वा।

### [3.2.4.1 न प्रतिभासनिबन्धनः]

---

**2** *Tātparyaṭīkā* ad *codanā* 47 (52.24–53.4): ननु "नेदं रजतम्" इत्यत्राभावो (इत्यत्राभावो ] ms.; इत्यभावो ऽपि ed.) रजतधर्मतयैवावभासते, न भावमात्रधर्मतया। कथं चानवभासमाने तस्मिन् तद्धर्मावगतिः। उच्यते। यत्पूर्वं प्रतिपन्नमपरोक्षधर्मतयैव रजतम्, इदानीं च स्मर्यते तदवच्छिन्नो ऽभावो ऽपरोक्षवस्तुधर्मतया प्रतीयते "नेदं रजतम्" इति। तच्चापरोक्षं धर्मि "नेदम्" इति (°रोक्षं धर्मि "नेदम्" इति ] ms.; °रोक्षमिदमिति ed.) बाधकप्रत्यये ऽवभासत एव। न तु प्रतिषेध्यप्रतिषेधयोर्धर्मधर्मिभावो ऽस्ति शुक्लपटयोरिव, विरोधात्। अप्रसक्तस्य (अप्रसक्तस्य ] ms.; अप्रसक्तस्यानु° ed.) प्रतिषेधो नास्तीति स्मृतौ तत्प्रसक्तमेव। न त्वत्रापरोक्षरजतधर्मतया लौकिकत्वं प्रतिपन्नमिदानीं च स्मर्यते। न चापरोक्षतया रजतमवभासते, येन तद्धर्मतया लौकिकत्वाभावो ऽवसीयेत।
**9** *Tātparyaṭīkā* ad *codanā* 47 (only in ms.; omitted at 52.15 before "*na tāvad ayaṃ*" due to eyeskip): अपि च लौकिकत्वालौकिकत्वविभागः प्रतिभासनिमित्तको वा स्यात्, व्यवहारसदसद्भावनिमित्तको वा।

---

**1** धर्मिणि ] $K_1P_1^{ac}$; ऽन्यधर्मिणि $MVL_1P_1^{pc}$ **1** °त्वेनालौकिकत्वं ] $K_1P_1$; °त्वेन लौकिकत्वं $MVL_1$ **1** गृह्येत ] $K_1P_1$; गृह्यते $MVL_1$ **2** त्वेष ] $MVK_1L_1P_1$; त्वेव $M^{ka}$ **6** त्वबाधित° ] $MVK_1L_1^{pc}P_1$; त्वबाधित्व° $L_1^{ac}$ **9** लौकिकालौकिक° ] $MVL_1P_1$; लौकिकालौकिकत्व° $K_1$

न तावत्प्रतिभासनिबन्धनः, तथाप्रतीत्यभावात्। क्वचिद्धि रजतं क्वचिच्च तदभावः प्रतीयते, न तु लौकिकत्वमलौकिकत्वं वा।

### [3.2.4.2 न व्यवहारनिबन्धनः]

अथ व्यवहारप्रवृत्त्यप्रवृत्तिभ्यां लौकिकत्वालौकिकत्वे व्यवस्थाप्येते, तद्वक्तव्यं को ऽयं व्यवहारो नामेति। ज्ञानाभिधानस्वभावो हि व्यवहारः, स च तद्विषयो नास्तीत्युक्तम्।

तदर्थक्रियाभिनिर्वर्तनं व्यवहार इति चेत्।

तर्हि स्वप्ने परिरभ्यमाणाया योषितः कूटकार्षापणस्य च लौकिक-

---

**1** *Tātparyaṭīkā* ad *codanā* 47 (52.15–20): **न तावदयं लौकिकालौकिकत्वप्रविभागः प्रतिभासनिमित्तकः। न हि रजतप्रतिभासोत्पत्तिकाले तद्धर्मतया लौकिकालौकिकत्वे प्रतिभासेते “लौकिकमिदं रजतम्” “अलौकिकमिदं रजतम्” इति वा। “नेदं रजतम्” इत्यत्रापि पूर्वप्रतिपन्नरजताभावमात्रावगतिः, न** (**न** ] ms.; **न हि** ed.) **पूर्वप्रतिपन्नापरोक्ष** (**°पन्नापरोक्ष°** ] ms.; **°पन्न°** ed.) **रजतानुवृत्तौ सत्यामेवालौकिकत्वं लौकिकत्वाभावो वापरोक्षरजतधर्मतयावभासते। इदं रजतमलौकिकमिदं वा** (**°त्वं लौकिकत्वाभावो** ··· **रजतमलौकिकमिदं वा** ] ms.; **°मिदं वा** ed.) **रजतं लौकिकं न भवतीति संवित्स्यात्।**

**7** *Tātparyaṭīkā* ad *codanā* 47 (53.9–12): **नापि रजतव्यवहारसदसद्भावनिमित्तकः। यतो** (**यतो** ] ms.; **कुतः** ed.) **ऽलौकिके ऽपि रजते स्वप्नावस्थायामप्यसकृदर्थक्रियादर्शनात्, जाग्रदवस्थायामपि कूटजयतुङ्गादिषु। लौकिके ऽपि चोत्पन्नविनष्टे घटे घटव्यवहाराभावात्।**

**8 कूटकार्षापणस्य** ] Cf. *Tantravārttika* ad 1.3.3 (179.12–13): **यो हि कूटकार्षापणेन कंचित्कालमज्ञो लोकमध्ये व्यवहरति, न तेन विवेकज्ञानजनितव्युत्पत्तिनापि तथैव व्यवहर्तव्यम्।**; *Tātparyaṭīkā* ad *codanā* 76 (65.9–10) (cf. Basak 1925:307; Jayatuṅga is referred to in the plate which has the date of grant as

---

**1 तथाप्रतीत्य°** ] $MK_1L_1P_1$; **यथाप्रतीति°** $M^{kha}V$ **2 °त्वं वा** ] $MVL_1P_1$; **°त्वं वा तस्मिन् विज्ञाने रजतस्वरूपवत् प्रकाशते** $K_1$ **4 °प्रवृत्त्यप्रवृत्तिभ्यां** ] $MVL_1P_1$; **°प्रवृत्तिभ्यां** $K_1$(eyeskip) **4 लौकिकत्वालौकिकत्वे** ] $K_1P_1$; **लौकिकालौकिकत्वे** $MVL_1$ **6 स च** ] $MK_1L_1P_1$; **स** $M^{kha}V$ **7 °भिनिर्वर्तनं** ] $K_1P_1$; **°निर्वर्तनं** $MVL_1$

**त्वं प्राप्नोति। उत्पद्य नष्टे च घटे तदर्थक्रियाया निवृत्तेरलौकिकत्वं स्यात्।**

**अपि च यः शुक्तिकायां रजतव्यवहारं न करोति, स रजताभावमेव बुद्ध्वा, न रजतस्य सतस्तस्यालौकिकताम्।**

[3.2.5 **विपरीतख्यातिरायाता**]

**यदि चेदमलौकिकं रजतम्, तत्किमर्थमिह तदर्थक्रियार्थी प्रवर्तते। अलौकिकं लौकिकत्वेन गृहीत्वेति चेत्। सैवेयं तपस्विनी विपरीतख्यातिरायाता।**

[3.2.6 **उपसंहारः**]

---

"the 44th year" (650 AD); it is probably the case that Umbeka refers to coins (*kārṣāpaṇa*) with the name of a King called Jayatuṅga): **अर्थक्रियासंवादात् क्वचित्कूटे ऽपि** (**अर्थक्रियासंवादात् क्वचित्कूटे ऽपि**] ms.; **असंवादात्। कूटे वि॰** ed.) **जयतुङ्गज्ञानं प्रमाणं स्यात्, कतिपयार्थक्रियादर्शनात्।**; *Śivadṛṣṭi* 4.20–21ab: **कूटकार्षापणादौ वा व्यवहारो ऽपि दृश्यते। तावता व्यवहारो वा यदात्माह्लादमात्रकम्॥ अर्थक्रियासमर्थत्वमेतदेवास्य वास्तवम्।**

**3** *Tātparyaṭīkā* ad *codanā* 47 (53.12–13): **अपि च ये तावद् रजतव्यवहारं न प्रवर्तयन्ति** (**प्रवर्तयन्ति**] ms.; **प्रत्याययन्ति** ed.), **ते रजताभावं प्रतिपद्यन्ते, न पुनरलौकिकत्वम्।**

**7** *Tātparyaṭīkā* ad *codanā* 47 (53.4–6): **अथ पूर्वमपरोक्षरजतधर्मतयावभासितस्यैव लौकिकत्वस्येदानीमपरोक्षतयानवभासमाने** (**॰यानवभासमाने**] ms.; **॰यावभासमाने** ed.) **रजते लौकिकत्वाभावस्तद्धर्मतयावसीयते "नेदं रजतं लौकिकम्" इति।**

**8** *Tātparyaṭīkā* ad *codanā* 47 (53.6–7): **हन्त** (**हन्त**] ms.; **वा** ed.) **तर्ह्यलौकिकं लौकिकत्वेनावभासितमिति** (**॰नावभासितमिति**] ms.; **॰नाभासितमिति** ed.) **सुदूरमपि गत्वा विपर्ययज्ञानान्न मुच्यसे** (**मुच्यसे**] ms.; **मुच्यामहे** ed.)**।**

---

**1 नष्टे च**] $P_1$; **नष्टे** $MVL_1$; **विनष्टे च** $K_1$ **1 तदर्थ॰**] $K_1P_1$; **ऽर्थ॰** $MVL_1$
**1 निवृत्तेर॰**] $MVK_1L_1$; **अनिवृत्तेर॰** $P_1$ **4 रजतस्य**] $MVL_1P_1$; **रजस्य** $K_1$
**6 रजतम्**] $MVK_1P_1$; om. $L_1$ **6 ॰क्रियार्थी**] $K_1P_1$; **॰क्रियार्थं** $MVL_1$

तस्माद् विपरीतख्यातिद्वेषेण कृतमीदृशा।
अत्रापि लोकसिद्धैव प्रतीतिरनुगम्यताम्॥
न वा मीमांसका एते स्वभार्यामपि वेश्मतः।
निःसारयितुमिच्छन्ति स्वतःप्रामाण्यतृष्णया॥
न चैवमपि तत्सिद्धिर् बुद्धिद्वैविध्यदर्शनात्।
संशये सति संवादसापेक्षत्वं तथैव तत्॥
क्लेशेन तदमुनापि स्वार्थस्तेषां प्रसिध्यति न कश्चित्।
यद् भवति दैवगत्या राजपथेनैव तद् भवतु॥

[4 उपसंहारः]

नात्मख्यातिर्बाह्यतयार्थप्रतिभासान्
नासत्ख्यातिर्न ह्यसतां धीविषयत्वम्।
उक्तो ऽख्यातौ दूषणमार्गो, विपरीत-
ख्यातिस्तस्मादाश्रयणीया मतिमद्भिः॥

---

**3 न वा मीमांसका** ] *Nyāyamañjarīgranthibhaṅga* 79.21: **न वा मीमांसका इति। विपरीतख्यातिरत्याज्यत्वाद् भार्यास्थानीया।**

---

**1 विपरीत॰** ] $MVK_1L_1$; **विपर्यय॰** $P_1$ **2 अत्रापि** ] $MVL_1$; **आत्सेक** $K_1$; **अज्ञो क** $P_1$ **3 वेश्मतः** ] $MVL_1P_1$; **वेश्मनः** $K_1$ **4 निःसारयितुमिच्छन्ति स्व॰** ] $MVL_1P_1$; **निस्सार इति** ++++ $K_1$ **6 संवाद॰** ] $MVL_1P_1$; **संवादे** $K_1$ **8 भवति** ] $MVL_1P_1$; **प्रभवति** $K_1$(unmetrical) **8 दैव॰** ] $MK_1L_1P_1$; **चैव** $M^{kha}V$ **8 राज॰** ] $MVK_1L_1$; **भद्वा॰** $P_1$ **13 ॰श्रयणीया॰** ] $MVK_1P_1$; **॰श्रणीया॰** $L_1$(unmetrical)